नवस्थायिभावाः त्रयत्रिंशद् व्यभिचारिभावाः तथा अष्टौ सात्विकभावाः मिलित्वा भावसंख्या पञ्चाशत् भवति । व्यभिचारिभावानां सत्ता अस्माकं मनसि सर्वदा न तिष्ठति । एते व्यभिचारिणः आवश्यकतानुसारं आगच्छन्ति । रत्यादि-स्थायिभावान् पोषयन्ति । स्थायिभावाः एव रसतां प्राप्नुवन्ति । संचारिभावाः रसपदवीं लब्धुं न शक्नुवन्ति इति भरतमुनेः सिद्धान्तः । स्थायिभावः सदा मनसि तिष्ठति । यथा भरतेन- **"यथा नराणां नृपतिः शिष्याणां च यथा गुरुः । एवं हि सर्वभावानां भावः स्थायी महानिह"** ॥ परन्तु सर्वत्र स्थायिभावाः मुख्याः न भवन्ति । नाटकेषु एको एव भावः मुख्यरूपेण परिगण्यते । अन्ये ये भावाः ते तत्र व्यभिचारिणः भवन्ति । एते भावाः मिलित्वा रसान् प्रकटयन्ति ।

भरतसूत्रस्योपरि भरतनाट्यशास्त्रस्य 'अभिनवभारती' टीकायां अभिनवगुप्तपादेन चत्वारि मतानि आलोचितानि । यथा-भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशंकुकस्य अनुमितिवादः, भट्टनायकस्य भुक्तिवादः तथा स्वस्य अभिव्यक्तिवादः ।

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

भट्टलोल्लटः मीमांसकः आसीत् । अस्य मतेन संयोगात् इति कार्यकारणभावसंबद्धः निष्पत्तिरित्यस्य 'उत्पत्तिः' इत्यर्थः भवति । अस्य मतेन रामादौ अनुकार्ये रसस्य स्थितिः । स्थायिभावेन सह विभावयोगात् उत्पाद्योत्पादकसम्बद्धः भवति,पुनश्च तेन अनुभावस्य योगात् गम्यगमकभावसम्बद्धो भवति, पुनश्च स्थायिभावेन व्यभिचारिभावसंयोगात् पोष्यपोषकभावसंबद्धः भवति। एतैः सम्बद्धैः रसस्योत्पत्तिर्भवति।

नटादौ रसोत्पत्तिः किञ्चिन्मात्रेण भवति । सामाजिके रसोत्पत्तिः नास्ति।

श्रीशंकुकः नैयायिकः । अस्य मते नटः कृत्रिमः । कृत्रिमाः चारुतया अभिनयं कुर्वन्ति येन सामाजिकाः नटे रामस्य प्रकृताभिनयं दृष्ट्वा अनुमानेन रसमास्वादयन्ति । चित्रतुरगन्यायेन नटे रामं दृष्ट्वा अयं रामः इति बुध्वा अनुमानेन रसमास्वादयन्ति ।

ISSN 0976-8645

भट्टनायकः सांख्यमतानुसारी आसीत् । अस्य मते अभिधाव्यापारः मुख्यः । अभिधया शब्दार्थयोः ज्ञानं भवति । पुनश्च भावकत्वव्यापारेण विभावादयः स्थायिभावाश्च साधारणीकृताः भवन्ति अपि च 'परस्य न परस्येति' 'मम न मम' इति ज्ञानबलेन सामाजिकाः भावनारूपकदोषबलेन नटं रामत्वेन भावयन्ति । अस्य मते मुख्यतः रसनिष्पत्तिः सामाजिके भवति ।

अभिनवगुप्तपादः शैववेदान्ती आसीत् । अस्य मते काव्ये नाट्ये च श्रवणेन, दर्शनेन विभावादीनां साधारणरूपेण ज्ञानात् सामाजिकानां मनसि स्थिताः रत्यादयः अभिव्यक्ताः भवन्ति । तेन सामाजिकाः परमानन्दमनुभवन्ति । स एव आनन्दः रसपदवीं धारयति । अस्य मतेन रसः न कार्यः, न ज्ञाप्यः, न निर्विकल्पज्ञानवेद्यः, न च सविकल्पज्ञानवेद्यः । अयं रसः विभावादिभिः सामाजिकानां सर्वाङ्गानि आलिङ्गति । रसः अलौकिकः अनिर्वचनीयः भवति । अस्य मतम् अत्यन्तं प्रसिद्धं भवति ।

अधुना एकैकस्य रसस्योपरि आलोचयामः ।

१.शृंगारः -

प्रथमः रसः भवति शृंगारः । शृणाति, विषमदशाप्रापणेन हिनस्ति युवकान् इति व्युत्पत्त्या शृंगपदं निष्पद्यते । शृंगं हि मन्मथोद्भेदः, शृंगमिति उपपदात् ऋ गतौ धातोः 'कर्मण्यम्' प्रत्ययेन शृंगारशब्दः जायते । शृंगारः द्विविधः- सम्भोगः, विप्रलम्भश्च । विप्रलम्भः पञ्चविधः –अभिलाषः, विरहः, ईर्ष्या, प्रवासः, शापः । नायकनायिकयोः मिलनं सम्भोगः । तयोः विच्छेदः विप्रलम्भः । अनुरागिणीं वेश्यां वर्जयित्वा अन्यसमस्तनायिकाः अस्य आलम्बनं, चन्द्रादयः उद्दीपनविभावाः । उग्रतामरणाऽलस्यजुगुप्सादीः वर्जयित्वा अन्ये समस्ताः अस्य व्यभिचारिणः । रतिः स्थायिभावः । विष्णुः देवता । अस्य वर्णः श्यामलः ।

२.हास्यः -

शृंगारात् अस्य रसस्य उत्पत्तिर्भवति । विकृतपरवेषालंकारअंगभंगिरूपः यत्र भवति तत्र हास्यरसः । अस्य स्थायी हासः । वर्णः श्वेतः । प्रमथः देवता । विकृतवाक् चेष्टा आलम्बनविभावः । आलम्बनस्य चेष्टा उद्दीपनम् । आत्मगोपनम्, आलस्यं, निद्रा, असूया व्यभिचारिणः । हास्यम् आदौ द्विविधम्- आत्मस्थहास्यं, परस्थहास्यं च । उत्तम-मध्यमाधमानां कृते हास्यस्य षड्भेदः प्रदर्शितः । तत्र उत्तमानां स्मितं, हसितम् । मध्यमानां विहसितम्, उपहसितं च । अधमानाम् अपहसितम्, अतिहसितं च ।

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

३.करुणः-

रौद्ररसात् अस्य उत्पत्तिर्भवति । शाप-क्लेश-विनिपात-विप्रयोग-वध-बन्धन-विद्रवादयः विभावाः भवन्ति । अश्रुपात-क्रन्दन-मुखशुष्कता-विवर्णतादयः अनुभावाः । शोकः स्थायिभावः। वर्णः कपोतः । यमो देवता । मृतजनः आलम्बनं,मृतजनस्य दाहः उद्दीपनः । करुणः त्रिविधः । धर्मोपघातजन्यः, वित्तनाशजन्यः, शोकजन्यश्च ।

४.रौद्रः-




ISSN 0976-8645

अयं क्रोधस्थायिभावात्मको रसः । रक्तवर्णः । रुद्रो देवता । शत्रुः आलम्बनविभावः । शत्रोः चेष्टादिकम् उद्दीपनम् । मुष्टिप्रहारः भूपतनम्, भ्रूकुटिनर्त्तनम् अनुभावः । उग्रता-आवेग-रोमाञ्चादयः व्यभिचारिणः ।

५.वीरः-

उत्साहः अस्य स्थायिभावः । गौरवर्णः । महेन्द्रदेवता । शत्रुः आलम्बनम् । प्रतिनायकस्य चेष्टा उद्दीपनविभावः । मतिस्मृतितर्कादयः व्यभिचारिणः । वीरः चतुर्विधः । दानवीरः, धर्मवीरः, युद्धवीरः, दयावीरश्च । पण्डितराज-जगन्नाथेन सत्यवीरः, धर्मवीरः, पाण्डित्यवीरः, क्षमावीरः इति चतुर्धा स्वीकृतः ।

६.भयानकः -

भयमस्य स्थायी । कृष्णवर्णः । कालदेवोऽस्य देवता । यस्मात् भयं जातं भवति सः आलम्बनविभावः । तस्य चेष्टा उद्दीपनम् । विवर्णता-स्वेद-रोमाञ्चादयः अनुभावाः । जुगुप्सा-शंकादयः व्यभिचारिणः ।

७.बीभत्सः-

अस्य स्थायी जुगुप्सा । नीलवर्णः । महाकालदेवता । दुर्गन्ध-मांस-रक्तादयः आलम्बनविभावाः । तस्मिन् मांसे कीटः उद्दीपनविभावः। वमनम् अनुभावः । नेत्रसंकोचनम् इत्यादयः व्यभिचारिणः । बिभत्सः द्विविधः, क्षोभजः, उद्वेगी । रुधिरादिजनितः बीभत्सः क्षोभजः । क्षोभजः शुद्धः । यस्तु विष्ठादिभ्यो उद्वेगी हृदयं चालयति सः अशुद्धः । अशुद्धः उद्वेगी भवति ।

८. अद्भुतः-

विस्मयः अस्य स्थायिभावः । पीतवर्णः । ब्रम्हा देवता । अलौकिकः पदार्थः आलम्बनविभावः । तस्य पदार्थस्य गुणकीर्त्तनम् उद्दीपनम् । स्तम्भ-स्वेद-रोमाञ्च-संभ्रम-नेत्रविकारादयः अनुभावाः । वितर्कावेगहर्षादयः, ये रसस्य परिपोषकाः ते व्यभिचारिणः ।

९.शान्तः-

शमः स्थायिभावः । स्वच्छवर्णः । बुद्धदेवता । संसारस्य अनित्यतादयः आलम्बनविभावाः । संसारः अनित्यः इति श्रवणम् उद्दीपनम् ।

उपसंहारः-

काव्यप्रकाशकारेण आचार्यमम्मटेन रसस्वरूपप्रसंगे-व्यक्तः स तै र्विभावाद्यैः स्थायिभावो रसः स्मृतः(का.प्र.४.१०) इति उक्तम् । साहित्यदर्पणे विश्वनाथेन लिखितम्- सहृदयपुरुषाणां हृदये स्थिता रत्यादयः स्थायिभावाः विभावानुभावैः अभिव्यक्ताः सन्तः रसरूपेण परिणमन्ति (सा.द.३.१)। धनञ्जयेन- विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः । आनीयमान स्वाद्यत्व स्थायिभावो रसः स्मृतः॥ (द.रू.४.१) । रसगंगाधरस्य प्रथमानने जगन्नाथेन-रत्याद्यवच्छिन्ना भग्नावरणाचिदेव रसः इति वदति। तत्रैव सः कथयति- अभिनवगुप्तमम्मटभट्टादिग्रन्थे स्वारस्येन भग्नावरणचिद्विशिष्टो रत्यादिः स्थायिभावो रसः इति स्थितम् (र.गं.१.७९) । अतः वक्तुं शक्यते रसस्वरूपप्रसंगे मतभेदः नास्ति व्याख्यानचतुष्टयं विहाय । मनः रजोगुणं तमोगुणं च अभिभूय सत्त्वगुणस्य आधिक्येन रसस्य साक्षात्कारः भवति इति विश्वनाथेन रसस्य अलौकिकत्वं प्रतिपादितम् (सा.द.३.२-३) । अतः रसः अलौकिकः । दर्शनयोग्यः न भवति । अयं रसः सहृदयेभ्यः आनन्दं प्रददाति इति सारांशः ।

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

## सहायकग्रन्थसूची

१.रससिद्धान्त के अनालोचित पक्ष (चतुर्वेदी ब्रजमोहन, अजन्ता पब्लिकेशन्, दिल्ली)

२. नाट्यशास्त्रम् ( चतुर्वेदी ब्रजमोहनः, विद्यानिधि- प्रकाशनम्, दिल्ली)

३.काव्यप्रकाशः(रथः सूर्यमणिः ,मणिव्याख्या ) |

४.दशरूपकम् (मालवीयः सुधाकरः, चौखम्बा कृष्णदास अकादमी,वाराणसी) |

५.साहित्यदर्पणः (चन्द्रकला संस्कृत-हिन्दीव्याख्योपेतम्,चौखम्बा प्रकाशनम्, वाराणसी) |

६.अलंकारशास्त्रस्येतिहासः (प्रो.केतकीनायकः,सांविदीप्रकाशनम्, पुरी) |

७.रसगंगाधरः (मिश्रः नारायणः,झा शशिनाथः, चौखम्बा प्रकाशनम्,वाराणसी

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018 ISSN 0976-8645

Paper Received on- 23.05.2018 Paper Published on 01-11-2018

# व्याकरणशास्त्रे स्फोटवादः

मनोजः[200]

---

**मुख्यशब्दः** – शब्दः, मनीषा, लौकिकः, ध्वनिः ।

---

शोधसारः-

लोपागमवर्णविकार-प्रकृतिप्रत्ययविभाग-ज्ञानविज्ञानकुशलानां नानाविध-वाग्रागरञ्जितचेतसां शुद्धशेमुशीजुषां साधुत्वासाधुत्वज्ञाने सुविख्यातवैदुष्यकुशलानां शाब्दिकानां मते शब्दानामेव प्रामाण्यं स्वीक्रियते । 'शब्दात् एव जगत्सृष्टिः' इति शाब्दिकाः अङ्गीकुर्वन्ति । सर्वस्यापि ज्ञानस्य मूलं शब्दाः एव । तदुक्तं भर्तृहरिणा –

*शब्दस्यपरिणामोऽयमित्याम्नायविदो विदुः ।*
*छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत[201] ।।*
*न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।*
*अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।[202]*

स्फोटवादोऽयं वैयाकरणानां मुख्यो विषयः । शब्दतत्त्वस्यैव अन्वर्थं नाम 'स्फोटः' इति वैयाकरणाः। महाभाष्यकारेण पतञ्जलिना अपि 'तपरस्तत्कालस्य'[203] प्रभृतिसूत्राणां रचनाक्रममाधारीकृत्यैव स्फोटतत्त्वप्रकाशितम् । तथा हि – 'स्फोटः शब्दः । ध्वनिः शब्दगुणः । कथम् ? भेर्याघातवत् । तद्यथा भेर्याघातः भेरीमाहत्य कश्चिद् विंशतिः पदानि गच्छति, कश्चित् त्रिंशत् कश्चिच्चत्वारिंशत् स्फोटस्तावानेव ध्वनिकृता वृद्धिः' ।

*ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।*
*अल्पो महांश्च केषाञ्चितदुभयन्तत् स्वभावतः ।।[204]*

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

स्फोटस्तावद् अन्तरप्रणवरूपत्वात् परब्रह्मस्वरूपमेव सः चैकः सन्नपि नानावर्णपदवाक्यरूपध्वनिरूपोपाधिभेदभिन्न नानात्मकजीवस्वरूपब्रह्मवत् पदवाक्यादिनानात्मको

---

200 शोधच्छात्रः, रा. सं. सं.वेदव्यासपरिसरः, बलाहरः (काङ्गड़ा)

201 वाक्यपदीयम् (ब्रह्मकाण्डम् – श्लोकसङ्ख्या १११)

202 वाक्यपदीयम् (ब्रह्मकाण्डम् – श्लोकसङ्ख्या ११४ )

203 अष्टाध्यायी सूत्रसङ्ख्या ०१.०१.७०

204 व्याकरणमहाभाष्यम् १.१. आ. ९. सू. ७०

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018 ISSN 0976-8645

मध्यमानादंशरूपरुपितो वैखरीरूपेण परश्रवणगोचरः बुद्धिनिर्ग्राह्यः सर्वार्थवाचको भवति । उक्तमपि श्रीमताभगवता पतञ्जलिना महाभाष्ये –

*श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलितः आकाशदेशः शब्द इति ।*[205]

'स्फुटति अर्थो अस्मात्' इति स्फोट, इति व्युत्पत्त्या, 'स्फुटयते व्यज्यते वर्णैः यः सः' इति व्युत्पत्त्या वा ध्वनिव्यङ्ग्यत्वे सति अर्थप्रकाशकत्वमेव स्फोटत्वम् । 'स्फुट् विकसने' धातोः घञ् प्रत्यये कृते सति 'स्फोटः' शब्दोऽयं निष्पद्यते । भट्टोजिदीक्षितेन शब्दकौस्तुभे स्फोटं निरुपयन् स वर्णपदवाक्याखण्डपदवाक्यवर्णजातिपदजातिवाक्यजाति इति अष्टधा विभक्तः । तदुत्तरञ्च कौण्डभट्टेन स्वकीये वैयाकरणभूषणसारग्रन्थे अष्टविधः वर्णपदवाक्याखण्डपदवाक्यवर्णपदवाक्यजातिस्फोटाख्येषु पञ्चसु भेदेषु समाहितः ।

एवं तर्हि स्फोटः शब्दः, ध्वनिः शब्दगुणः कथम् ? भेर्याघातवत् स्फोटस्तावानेव भवति, ध्वनिकृता वृद्धिः । एतदनुसारेण सार्थको वर्णसमुदायः शब्दः। स एव स्फोटसंज्ञया व्यवह्रियते । परस्तु नादात्मको ध्वनिः । यच्च तत्र तारमन्द्रविलम्बितादिरूपवैविध्यमनुभूयते, तत् खलु ध्वनिगतम् । यथा कश्चिद्भेर्याघातो भेरीमाहनन् पदशतं गच्छति परश्च परः शतं तर्हि पूर्वकृतभेरीताडनस्य नादो गुरुर्भवति परकृतस्य चाल्पीयान् ध्वनिरेव हि तावद् इदं गच्छति । अयं तस्यैवोच्चारितस्याऽनुरणनात्मा । नाद एव चाऽसावनित्यो न तु शब्दस्वरुपघटको वर्णसमुदायः। अत एवोक्तम् –

"नित्याश्च शब्दाः । नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः"[206] । 'शब्दस्य लक्षणञ्च भाष्यकृता पतञ्जलिनैवोक्तम्- श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलितः आकाशदेशः शब्द इति । एकश्च पुनराकाशम् । एतेनैव लक्षणेन शब्दस्य नादात्मकाद् ध्वनेर्व्यवच्छेदः क्रियते । यथा यत्र ध्वनिः श्रोत्रोपलब्धिः श्रोत्रनिर्ग्राह्यश्च तत्र शब्दः श्रवणेन्द्रियेणोपलभ्योपि बुद्धिनिर्ग्राह्यो भवति' ।

अत्रेदं तत्त्वं नादाकारो ध्वनिः प्रत्यक्षप्रामाण्येनाऽनित्यः श्रवणोत्तरक्षणे च विलोपं गच्छति, परं वर्णाः स्वरुपतो नित्याः कूटस्था अविचालिनश्च । उच्चार्यमाणेषु तेषु तेषां नादो द्रुतं नश्यति परं संस्कारेण ते बुद्धौ तिष्ठन्ति । यदाऽन्तिमो वर्ण उच्चार्यते, तदा संस्कारस्थिताः पूर्वेऽपि तेन सह संयुज्यन्ते, ततः शब्दस्य निर्धारितं रूपं बुद्धिगतं जायते, तदेव स्फोटसंज्ञया व्यपदिश्यते । अस्मिन्नुच्चारिते च तस्यार्थत्वेनेष्टं वस्तु बुद्धौ मूर्तं भवति । यथा गौरित्युक्ते श्रोतर्बुद्धौ सास्नाङ्गूलककुदखुरविषाण्यादिपिण्डं प्रस्फुरति । अयमेवार्थं आचार्यभर्तृहरिणोदितः–

*अलपीयसाऽपि यत्नेन शब्देनोच्चारितं मतिः ।*

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

[205] व्याकरणमहाभाष्यम् १.१.२

[206] व्याकरणमहाभाष्यम् १.१.आ २.



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018 ISSN 0976-8645

*यदि वा नैव गृह्णाति वर्णं वा सफलं स्फुटम् ।।*

*शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः ।*

*ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ।।*[207]

'स्फुटत्यर्थोऽस्मात् इति स्फोटः' इति व्युत्पत्त्याऽर्थवाचकः शब्द एव स्फोटः उच्यते । अस्याष्टौ भेदाः –

वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटश्च । अयञ्च स्फोटात्मकः शब्द एव ब्रह्म नित्यं सत्यमखण्डं निर्गुणमनिर्वचनीयञ्च । तथैव शब्दोऽपि नित्यः सत्योऽखण्डोनिर्गुणोऽनिर्वचनीयश्च । पाणिनेः 'अर्थवदधातुरप्रत्ययः प्रातिपादिकम्'[208] इतिसूत्रस्थानि विशेषणचतुष्ट्यानि साभिप्रायाणि । तत्रैव अर्थवच्छब्देन स्फोटस्य सार्थकत्वम् अर्थबोधकत्वं वा सूच्यते । ब्रह्मपक्षेऽपि तस्य सर्वार्थबोधकत्वं प्रतिपाद्यते। आचार्यभर्तृहरिमतानुसारेणाऽखण्डवाक्यस्फोटः स्वीक्रियते । तस्य मते पदेषु वस्तुतो वर्णा न सन्ति, न च वर्णेषु ऐकारौकारगकारादिषु अवयवाः । अथ च वाक्यात् पदानामत्यन्तं प्रविवेकः भेदो न वर्तते । अर्थात् वाक्ये पदविभागद्वारा पदे प्रकृतिप्रत्ययरूपवर्णविभागद्वारा, वर्णेष्वयवविभागद्वारा च वाचकत्वमपितु, समुदायशक्त्या वाक्यस्य वाचकत्वम् – इति अखण्डवाक्यस्फोट एव मुख्यः । इत्युक्तं श्रीभर्तृहरिणा –

*"पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।*

*वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन"*[209] *।।*

न च ककारो गकारः इति प्रतीतिरेव वर्णकल्पने मानम्, तत्तद्वर्णोत्पादकत्वेनाऽभिमतवायुसंयोगनिष्ठतत्तद्वर्णजनकताया व्यञ्जकताया वाऽवच्छेदकं वैजात्यमादायैव ककारो गकार इति प्रतीतिवैलक्षण्यसम्भवात् । स्पष्टं हि भामत्याम् – 'तारत्वादिवायुनिष्ठवर्णेष्वारोप्यते' । इति देवताधिकरण इति । न चैवं वायुसंयोग एव वाचकः किन्न स्यादिति वाच्यम्, प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्याऽनुभवसिद्धत्वात् । तथा च वाचकत्वाऽन्यथानुपपत्त्या 'तदेवेदं पदम्', 'तदेवेदं पदम्', 'तदेवेदं वाक्यम्', 'तदेवेदं वाक्यम्', 'सोऽयं गकारः', 'सोऽयं गकारः', इति प्रतीत्या चाऽखण्डवाक्यस्फोटः सिद्धयति ।

नन्वेवं शास्त्राप्रमाण्यप्रसङ्गः, पदवाक्ययोरखण्डत्वात् शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां व्युत्पादनपरत्वादिति चेन्न, उत्तरमींमासायाम् अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयरूपपञ्चकोशावतरणस्य सर्वाधारब्रह्मबोधकत्ववत्

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

[207] वाक्यपदीयम् ब्रह्मकाण्डम् श्लोकसङ्ख्या ७६

[208] अष्टाध्यायी सूत्रसङ्ख्या १.०२.४५

[209] वाक्यपदीयम् ब्रह्मकाण्डम् श्लोकसङ्ख्या ७२

प्रकृतिप्रत्ययादिविचारस्याऽखण्डस्फोटबोधनोपायत्वेना-दोषत्वात् । ननु शास्त्रज्ञानं विनाऽपि गामानयेति वाक्यमात्रव्युत्पन्नस्य पामरादेरपि शाब्दबोधेन तत्र स्फोटज्ञानस्य जायमानत्वान्नैतच्छास्त्रं पञ्चकोशवत् स्फोटज्ञानोपाय इति चेत् ? न, प्रकारान्तरेण तज्ज्ञानसम्भवेऽपि प्रकृतिप्रत्ययव्युत्पादनपूर्वकविजातियतज्ज्ञानस्य स्वपूर्वप्रयोगद्वारा शरीरशुद्धिफलकस्य तत्फलत्वेनाऽदोषात् । तदुक्तं श्रीहरिणा –

*"तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्"*[210] ।

एवञ्च विजातियज्ञान एव शास्त्रस्योपयोग इति न तृणादिवद् व्यभिचारः । लघुनोपायेन सकलशब्दप्रतिपत्तौ च शास्त्रस्योपयोगो बोध्यः । न च प्रकृतिप्रत्ययविभागस्यकाल्पनिकत्वे शशविषाणप्रायत्वम्, पञ्चकोशादिवदस्यापि सदसद्विलक्षणत्वात् । एवं रेखागवयन्यायेनापि शास्त्रमुपायः । एवं हरेऽवेत्यादौ प्रत्येकपदज्ञानपूर्वकं बोध इति सखण्डवाक्यस्फोटः । प्रकृतिप्रत्ययादिकल्पना रेखागवयन्यायेन तद्बोधितमखण्डः प्रकृतिप्रत्ययादिविभागाऽनाश्रयः पदादिबोधक इत्यखण्डवाक्यस्फोट इति तत्त्वम् । तथा चोक्तं भूषणसारे-

*"वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतिस्थितिः"*[211] ।

***सन्दर्भग्रन्थसूची***

1. अष्टाध्यायी सूत्रपाठः (पाणिनिः) संस्करण सङ्ख्या २००९, चौखम्बा विद्याभवन वाराणसी
2. वाक्यपदीयम् ब्रह्मकाण्डम् (भर्तृहरिः) हिन्दी व्याख्याकार डॉ. शिव शङ्कर अवस्थी, चौखम्बा विद्याभवन वाराणसी।
3. वैयाकरणभूषणसारः (कौण्डभट्टः) हिन्दी व्याख्याकारः डॉ. चन्द्रिकाप्रसाद द्विवेदी, संस्करण सङ्ख्या २०११, चौखम्बा संस्कृत प्रतिष्ठान ३८ यू. ए. बंगलो रोड, जवाहरनगर दिल्ली ११०००७
4. व्याकरणमहाभाष्यम् (पतञ्जलिः) अनुवादक व विवरणकार चारुदेव शास्त्री, मोतीलाल बनारसीदास दिल्लीतः प्रकाशितम् संस्करणम् २०११।

210 वाक्यपदीयम् ब्रह्मकाण्डम् श्लोकसङ्ख्या १४

211 वैयाकरणभूषणसारम् कारिकासङ्ख्या ६१





Paper Received on- 01.09.2018 Paper Published on 01-11-2018

# शाब्दिकमीमांसकयोराख्यातार्थभेदविमर्शः

डा.जयकृष्णः[212]

---

**मुख्यशब्दः** – आख्यातार्थः, भावना, विवरणम्, फलम्, तात्पर्यम्, व्यापारः, आश्रयः।

---

**शोधसारः**

शाब्दिकैस्तावत् शब्दविषयकं चिन्तनं सूक्ष्मतया कृतं वर्तते। शब्दा अनन्ताः, नित्याः स्फोटरूपशब्दब्रह्मण एव च प्रतिबिम्बभूता इति वैयाकरणानां कश्चन नयः दार्शनिकः। सकलस्यापि शब्दस्य आधारभूतः धातुः। विविधैः दार्शनिकैः धातोः अर्थस्य विषये सूक्ष्मतया चिन्तनं कृतं वर्तते। वैयाकरणैस्तु अस्मिन् विषये मतान्तरविमर्शपूर्वकम् अचिन्ति। प्रकृतिभूतः धातुः प्रत्ययेन मिलित्वा तिङन्तानां पदानां निर्माणं करोति। तिङश्च इमे आख्यातनाम्ना ख्याताः सन्ति। यथा धात्वर्थचिन्तनं सूक्ष्मतया अकारि दार्शनिकैः तथैव आख्यातस्यापि चिन्तने महत् शेमुषीवैभवं दृश्यते विपश्चिताम्। तत्र आख्यातार्थः कृतिरिति नैयायिकाः आख्यातार्थः व्यापार इति च मीमांसकाः। वैयाकरणास्तु कर्तृ-कर्म-सङ्ख्या-कालान् चतुर आख्यातार्थं मन्वते। नैयायिकैः सह तावत् आख्यातार्थमभेदः नाधिकः वैयाकरणानाम्। यतः कृतिर्नाम यत्नविशेषः यश्च क्रियाया महद् व्यत्यासं न भजते। परन्तु वैयाकरणाः तावत् यां भावनां (व्यापारम्) धात्वर्थं मन्वते सा मीमांसकैः विवरणादिना आख्यातार्थत्वेन ख्यायते। अयं मतभेदः वैयाकरणमीमांसकयोः। अस्मिन् मतभेदे मिथः सिद्धान्तप्रतिपादने आक्षेपा वर्तन्ते केचन। त इह लेखे उभयोरपि तुलनात्मकविमर्शद्वारा प्रतिपाद्यते।

जगतः अखिलः वाग्व्यवहारः शब्दाश्रितः। शब्दैरेव वाक्यसंरचनाद्वारा प्रसङ्गबोधः कार्यते। अयं हि श्रूयमाणः दृश्यमाणो वा शब्दः अन्वाख्यानपक्षे यस्मात् उत्पद्यते स भवति धातुः। धातुजस्य शब्दस्यास्य अर्थप्रतिपत्तिः न तावत् सम्भवति यावत् धातोः अर्थः स्फुटः न स्यात्। धातोः च अर्थस्पष्टतार्थं फलस्य, व्यापारस्य, आख्यातस्य च अर्थस्पष्टता अपेक्षिता भवति। यतः अमीषां समवायेनैव धात्वर्थस्पष्टताद्वारा शाब्दबोधप्रक्रियायाः निर्वाहो भवति। तथाह्यत्र वैयाकरणाः –

**फलव्यापारयोः धातुराश्रये तु तिङः स्मृताः।**
**फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम्**[213]॥ इति

एवञ्च 'देवदत्तः ओदनं पचति' इत्यत्र **'देवदत्ताभिन्नैककर्तृक ओदनकर्मको वर्तमानकालिको विक्लित्यनुकूलो व्यापारः'** इत्येवं व्यापारमुख्यविशेष्यकः शाब्दबोधः प्रसज्यते वैयाकरणानां मते।

212 (व्याकरण-अतिथि-प्राध्यापकः), राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, बलाहरः, प्रागपुरम्, कांगडा हि.प्र. (१७७१०८)

213 कौण्डभट्टः (व्याख्याता – चन्द्रिकाप्रसाद द्विवेदी), (2005), वैयाकरणभूषणसारः, पृष्ठ संख्या - 6, वाराणसी, चौखम्बा सुरभारती प्रकाशनम्।

○ **पञ्चम आक्षेपः –**

पच ति इति भागद्वयवत् पचति इति पदम्। इह पच इत्यस्य पाकं ति इत्यस्य च करोति इति विवरणं भवति। अत्र करोति इत्यस्य ति इत्यस्मिन् कृ इत्यस्य अर्थः भावना वर्तते। अनेन विवरणेन स्फुटम् इदं भवति यत् भावना आख्यातार्थः अस्ति। अतः भावनायाः आख्यातार्थत्वे विवरणमेव प्रमाणम् अस्ति। तेन आख्यातार्थः व्यापारः भवत्विति।

**निरासः -**

मीमांसकैः प्रतिपादितेन विवरणेन व्यापारः आख्यातार्थः न सिद्ध्यति, यतः पच इत्यस्य पाकं करोति ति इत्यस्य च ति इत्येव विवरणं सङ्गतमस्ति। अतः पच इत्यस्य पाकम्, अर्थात् फलम् इति, कृ इत्यस्य व्यापार इति, ति इत्यस्य कर्ता आश्रय इत्यस्य च ति इत्यादिविभागानुसारेण ति इत्यस्य विवरणं पाकानुकूलव्यापारस्य आश्रयः कर्ता एव भवति। विवणस्य माध्यमेन अपि कर्तुः आख्यातार्थत्वे अपि साम्यमेव आयाति। एतेन फलितं यत् विवरणम् अपि आख्यातार्थस्य व्यापारत्वस्य प्रतिपादकं नास्तीति। शब्दान्तरैस्तदर्थप्रतिपादनं विवरणम् इति कथ्यते।

❖ **कर्तुराख्यातार्थत्वे वैयाकरणस्य युक्त्यन्तरम् -**

**पचति देवदत्तः** इत्यादौ अभेदान्वयदर्शनात् तदनुरोधेन कर्तुः वाच्यत्वम् आवश्यकं भवति, यथा **पक्ता देवदत्त** इत्यादौ भवति। **पचति देवदत्तः** इत्यत्र च **'सोमेन यजेत', 'स्तोकं पचति', 'राजपुरुषः'** इत्यादिवत् असमानविभक्तिकत्वे अपि अभेदान्वयवत् अभेदान्वयः ज्ञेयः।

इत्थं चात्र लेखे वैयाकरणभूषणसारग्रन्थमादाय शाब्दिकमीमांसकयोः मतभेदपूर्वकः आख्यातविमर्शो व्यधायि। यद्यपि सङ्ख्यायाः कालस्य चाख्यातार्थत्वेऽपि दर्शनान्तरीयमतभेदा दृश्यन्ते, तेषां विस्तराय तु ग्रन्थ एव द्रष्टव्यः।

❖ **सन्दर्भतग्रन्थसूची –**

१. वैयाकरणभूषणसारः, रचयिता – कौण्डभट्टः, (व्याख्याता - चन्द्रिकाप्रसादद्विवेदी), संस्करणम् – २०११, चौखम्बा संस्कृत प्रतिष्ठान ३८ यूए. बंगलो रोड ., जवाहरनगर दिल्ली ११०००७
२. महाभाष्यम्, रचयिता – पतञ्जलिः, (सम्पादकः – भार्गवशास्त्री), संस्करणम्-२००४, चौखम्बासंस्कृतप्रतिष्ठानप्रकाशनम् - वाराणसी।
३. न्यायसिद्धान्तमुक्तावली, रचयिता विश्वनाथपञ्चाननभट्टाचार्य, (सम्पादकः – डा.आर्.बालमुरुगन्), संस्करण सङ्ख्या २००६, राष्ट्रिय-संस्कृत-संस्थानम् – नवदेहली।
४. शाब्दबोधमीमांसा, रचयिता – एन्.एस्.रामानुजताताचार्यः, संस्करण सङ्ख्या २००६, राष्ट्रिय-संस्कृत-संस्थानम् – नवदेहली।

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in





Paper Received on- 01.09.2018 Paper Published on 01-11-2018

# नैय्यायिकमते धात्वर्थविमर्शः

**वाणी मञ्जुनाथ हेगडे**[222]

---

**मुख्यशब्दः** – धात्वर्थः, भावना, फलम्, व्यापारः, तिङर्थः, सकर्मकत्वम्, आश्रयः।

---

**शोधसारः**

शोधपत्रेऽस्मिन् मया **नैय्यायिकमते धात्वर्थः विचारः** व्यमर्शि। तुलनात्मकाध्ययनपूर्वकम् अत्र मया शास्त्रान्तरेषु धात्वर्थः कः इति प्रमाणपुरस्सरं व्यचारि। अत्रापि विशिष्य नव्य-प्राचीननैय्यायिकानां ,वैय्याकरणानां मीमांसकानाञ्च नये धात्वर्थः न्यरूपि। जगति पदार्थानां निरूपणे नैय्यायिकानां वैय्याकरणानां च महद्योगदानं वरीवर्ति। अत एव उक्तं -'**काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमि**'ति। धात्वर्थविषये मतभेदाः बहवः दरीदृश्यन्ते। फलावच्छिन्नव्यापारः धात्वर्थः ,फलं व्यापारश्च विशकलितं वा धात्वर्थः इति नव्यनैय्यायिकाः। फलं कर्मप्रत्ययार्थः, व्यापारमात्रं धात्वर्थः इति प्राचीननैय्यायिकाः। व्यापारानुकूलप्रयत्नः आत्मसमवेतः तिङर्थः इति नैय्यायिकाः। फलं व्यापारश्च (प्रयत्नः) धात्वर्थः। तयोराश्रयः (फलाश्रयः व्यापाराश्रयश्च) कर्ता कर्म च तिङर्थः इति वैय्याकरणाः। किञ्च फलमात्रं धात्वर्थः, व्यापारः तिङर्थः इति मीमांसकाः। तत्र च व्यापारो नाम भावना। भावना च भवितुर्भवनानुकूलो भावकव्यापारः सर्वेषां लकाराणामर्थः। विधिभावना तु प्रवर्तनात्मिका लिङ्लोट्तव्यप्रत्ययपञ्चलकारेभ्य एव अवगम्यते। सा च द्वेधा शब्दार्थी च। प्रत्येकं फलकरणेतिकर्तव्यतांशैस्त्रंशा। इत्येवं धात्वाख्यातार्थविषये अन्यान्यमतानि सन्ति। तत्र शाब्दबोधे भासमानपदार्थेषु प्रायः प्रथमान्तार्थस्य मुख्यविशेष्यत्वं नैय्यायिकाः युक्त्या संपादयन्ति। तत्र प्राच्यनव्यसकलग्रन्थपरामर्शपूर्वकं गदाधरभट्टाचार्यैः व्युत्पत्तिवादे प्रस्तुतः धात्वर्थविचारः शोधपत्रेऽस्मिन् समग्राहि। फलत्वस्य लक्षणेन सह सकर्मकत्वाकर्मकत्वयोः लक्षणमत्र प्रत्यपादि। एवमेव केवलव्यापारः धात्वर्थः इति वदतां प्राचीनानां मते अस्वारस्यमुद्भाव्य, फलावच्छिन्नव्यापारो धात्वर्थः, फलान्वयि आधेयत्वं द्वितीयार्थः इति नवीनमतोपन्यासः मया अत्र अकारि। एवमेव प्राचीननवीननैय्यायिकमतयोः युक्त्ययुक्तिचिन्तनपुरस्सरं शोधपत्रस्य उपसंहारः मया अकारि।

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

222 (शोधच्छात्रा), राष्ट्रियसंस्कृतसंस्थानम्, राजीवगान्धी परिसरः, मेणसे, शृङ्गरी ,चिक्कमगलूरु , कर्नाटक(५७७१३९)

लोके पदार्थानां प्रतिपादने न्याय-व्याकरणयोरुपयोगित्वं सर्वत्रैव स्वीकृतम्। अत एव **'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्'** इति भण्यते अभियुक्तैः। अमुष्मिन् च शास्त्रद्वये सत्सु नैकेषु विचारेषु विशिष्य धात्वर्थोऽतीव सूक्ष्मतया व्यचारि विद्वद्भिः।

अस्मिन् हि धात्वर्थविषये मतभेदाः दरीदृश्यन्ते। फलावच्छिन्नव्यापारः धात्वर्थः, फलं व्यापारश्च विशकलितं वा धात्वर्थः इति नव्यनैय्यायिकाः। फलं कर्मप्रत्ययार्थः, व्यापारमात्रं धात्वर्थः इति प्राचीन नैय्यायिकाः। व्यापारानुकूलप्रयत्नः आत्मसमवेतः तिङर्थः इति नैय्यायिकाः। फलं व्यापारश्च (प्रयत्नः) धात्वर्थः। तत्र **व्यापारस्तु भावनाभिधा साध्यत्वेन अभिधीयमाना क्रिया**[223] इति गदितं भूषणकारेण। तयोराश्रयः (फलाश्रयः व्यापाराश्रयश्च) कर्ता कर्म च तिङर्थः इति वैय्याकरणाः।

तदुक्तं वैय्याकरणनये –

**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।**
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्**[224]॥ इति।

किञ्च फलमात्रं धात्वर्थः, व्यापारः तिङर्थः इति मीमांसकाः। तदुक्तं **भाट्टरहस्यमर्मप्रकाशे –फले पृथगेव धातोः शक्तिः, तस्य व्यापारे प्रकारत्वमेव अवच्छेदकत्वम्।**[225] तत्र च व्यापारो नाम भावना। तदुक्तं **भाट्टभाषाप्रकाशे- भावना च भवितुर्भवनानुकूलो भावकव्यापारः।** सर्वेषां लकाराणामर्थः। विधिभावना तु प्रवर्तनात्मिका लिङ्लोट्तव्यप्रत्ययपञ्चमलकारेभ्य एव अवगम्यते। सा च द्वेधा शब्दार्थी च। प्रत्येकं फलकरणेतिकर्तव्यतांशैस्त्रंशा। [226] इत्येवं धात्वाख्यातार्थविषये अन्यान्यमतानि सन्ति। तत्र नैय्यायिकमतरीत्या धात्वर्थः विमृश्यते। प्रत्यक्षानुमित्युपमितिशाब्दबोधस्मरणभेदेन पञ्चधा ज्ञानानां विभागः नैय्यायिकमते समाद्रियते। तत्र शाब्दबोधः पदज्ञानकरणकः पदार्थोपस्थितिव्यापारकः अङ्गीक्रियतेनैय्यायिकैः। तदुक्तं कारिकावल्याम्-

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥८१॥**[227]

तत्र शाब्दबोधे भासमानपदार्थेषु प्रायः प्रथमान्तार्थस्य मुख्यविशेष्यत्वं नैय्यायिकाः युक्त्या संपादयन्ति। तत्र प्राच्यनव्यसकलग्रन्थपरामर्शपूर्वकं गदाधरभट्टाचार्यैः व्युत्पत्तिवादे प्रस्तुतः धात्वर्थविचारः संगृह्यते ।

**कर्मत्वं क्रियाजन्यफलशालित्वम्।** [228] तत्र क्रिया धातुतः एव लभ्यते। जन्यजनकभावरूपः फलव्यापारयोः सम्बन्धः आङ्काक्षया(संसर्गमर्यादया) भासते। अतः कर्मण्यर्थे विहितस्य द्वितीयादेः

---

[223] कौण्डभट्टः,(व्याख्याता – महामहोपाध्यायः पेरीसूर्यनारायणशास्त्री), 2016, भूषणसारः, पृष्ठसंख्या – 19, तिरुपतिः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः।

[224] कौण्डभट्टः,(व्याख्याता – महामहोपाध्यायः पेरीसूर्यनारायणशास्त्री), 2016, भूषणसारः, पृष्ठसंख्या – 11, तिरुपतिः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः।

[225] डा.सत्यपालासिंहः, 2003, भाट्टरहस्यमर्मप्रकाशः, पृष्ठसंख्या-54, दिल्ली, शिवालिक प्रकाशन।

[226] श्रीमन्नारायणतीर्थः,(व्याख्याता-लक्ष्मीनारायणमूर्तिः), 2005, भाट्टभाषाप्रकाशः, पृष्ठसंख्या-9, तिरुपतिः, राष्ट्रियसंस्कृतविद्यापीठम्।

[227] श्रीविश्वनाथपञ्चाननभट्टाचार्यः,(संपादकः-नारायणसूनुः),2012,कारिकावली, पृष्ठसंख्या -356, वाराणसी, चौखम्बा कृष्णदास अकादमी।

[228] गदाधरभट्टाचार्यः,(संपादकः-हरेकृष्णशतपथी),2011, व्युत्पत्तिवादः प्रथमो भागः, पृष्ठसंख्या -201, तिरुपतिः, राष्ट्रियसंस्कृतविद्यापीठम्।





संयोगादिफलमात्रमर्थः। धातोः व्यापारमात्रमर्थः। तथा च **चैत्रः ग्रामं गच्छति** इत्यादौ द्वितीयायाः संयोगोर्थः। तत्र आधेयतासम्बन्धेन प्रकृत्यर्थस्य ग्रामस्य अन्वयः। संयोगस्य जनकतासम्बन्धेन धात्वर्थक्रियायामन्वयः। क्रियायाः अनुकूलतासम्बन्धेन आख्यातार्थकृतावन्वयः। कृतेश्च समवायसम्बन्धेन आश्रयतासम्बन्धेन वा चैत्रे अन्वयः इति ग्रामनिष्ठसंयोगजनकक्रियानुकूलकृत्याश्रयः चैत्रः इति बोधः। चैत्रेण ग्रामो गम्यते इति वाक्यात् चैत्रवृत्तिकृतिजन्यव्यापारजन्यसंयोगाश्रयो ग्रामः इति बोधः। **फलत्वं च धात्वर्थे विशेषणतया भासमानत्वे सति धात्वर्थजन्यत्वम्।** फलान्वित व्यापारबोधकत्वमेव धातोः सकर्मकत्वम्। **मन्दं गच्छति द्रुतं गच्छति** इत्यादौ धात्वर्थव्यापारे तादात्म्येन मन्दादेरन्वयात् मन्दादावतिप्रसङ्गवारणाय विशेष्यम्। गम्यादिधात्वर्थसंयोगानुकूलव्यापारजन्यत्वस्य पूर्वदेशविभागादौ सत्त्वात् तत्रातिव्याप्तिवारणाय सत्यन्तम्।

न च घटं जानातीत्यादौ ज्ञानादेः सकर्मकत्वं न स्यात्, तत्र विषयत्वस्यैव द्वितीयार्थतया अखण्डोपाधेस्तस्य नित्यत्वेन धात्वर्थजन्यत्वघटित फललक्षणाभावात् इति वाच्यम्। तत्र विषयत्वं च धात्वर्थः विषयत्वान्वय्याधेयत्वं द्वितीयार्थः। धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति व्यापारभिन्नत्वं फलत्वमिति फललक्षणसंभवात्। यद्वा तत्र विषयत्वस्य द्वितीयार्थत्वपक्षे धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति व्यापारत्वभिन्नत्वं फलस्य लक्षणम्। तदाश्रयत्वं कर्मत्वमिति प्राचीनमतम् ।

❖ **केवलव्यापारः धात्वर्थः इति वदतां प्राचीनानां मते अस्वारस्यम् –**

व्यापारमात्रस्य धात्वर्थत्वे **ग्रामं गच्छति, ग्रामं त्यजती**त्यादावनुभूयमानं प्रतीतिवैलक्षण्यं नोपपद्येत। **ग्रामं गच्छति, ग्रामं त्यजती**त्यत्र अविलक्षणबोधप्रसङ्गः। संयोगरूपफलप्रकारकव्यापारविशेष्यकशाब्दबोधं प्रति गम्-धातुजन्यव्यापारोपस्थितिः कारणम्। विभागरूपफलप्रकारकव्यापारविशेष्यकशाब्दबोधं प्रति त्यजधातुजन्यव्यापारोपस्थितिः कारणमिति कारणत्वकल्पने तु गौरवम्। त्यागो गमनम् इत्यापत्तेश्च। उभयोरपि व्यापारवाचकत्वाविशेषात्। तत्र फलावच्छिन्नव्यापारवाचकत्वाङ्गीकारे तु सर्वत्र तथैव उचितम्।

❖ **फलावच्छिन्नव्यापारो धात्वर्थः फलान्वयि आधेयत्वं द्वितीयार्थः इति नवीनमतोपन्यासः -**

**संयोगादिफलविशेषावच्छिन्नव्यापारो गम्यादिधात्वर्थः।** [229] **तद्धात्वर्थानधिकरणत्वे सति तद्धात्वर्थतावच्छेदकफलशालित्वमेव तद्धातुकर्मत्वम्।** [230] चैत्रो गच्छतीत्यादौ

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

---

[229] गदाधरभट्टाचार्यः,(संपादकः-हरेकृष्णशतपथी),2011, व्युत्पत्तिवादः प्रथमो भागः, पृष्ठसंख्या -209, तिरुपतिः, राष्ट्रियसंस्कृतविद्यापीठम्।

[230] गदाधरभट्टाचार्यः,(संपादकः-हरेकृष्णशतपथी),2011, व्युत्पत्तिवादः प्रथमो भागः, पृष्ठसंख्या -209, तिरुपतिः, राष्ट्रियसंस्कृतविद्यापीठम्।

**अनुशीलितग्रन्थसूची –**

१. व्युत्पत्तिवादः, (गदाधरभट्टः) व्याख्याकारः – एन्.एस्.रामानुजताताचार्यः, संस्करण सङ्ख्या २०११, राष्ट्रिय-संस्कृत-विद्यापीठम् – तिरुपतिः।

 ISSN 0976-8645

धात्वर्थतावच्छेदकसंयोगवतश्चैत्रस्य गमिकर्मत्ववारणाय सत्यन्तम्। धात्वर्थजन्येत्युक्तौ पूर्वदेशविभागस्यापि गम्यर्थव्यापारजन्यतया तद्वतः पूर्वदेशस्य गमिकर्मत्वापत्तिः। तद्वारणाय तद्धात्वर्थजन्येत्यनुक्त्वा तद्धात्वर्थतावच्छेदकेत्युक्तम्। फलपदं क्रियाजन्यपरम्। तेन धात्वर्थतावच्छेदकीभूतं व्यापारत्वमादाय तदाश्रयस्य व्यापारस्य न कर्मत्वापत्तिः। फलावच्छिन्नव्यापारवाचकत्वं सकर्मकत्वम्। तेन स्पन्दिप्रभृतेः न सकर्मकत्वम्। तत्र धातोः व्यापारमात्रवाचकत्वेन धात्वर्थतावच्छेदकफलाभावात् इति नव्यमतम्।

### ❖ प्राचीननवीनमतयोः युक्त्ययुक्तचिन्तनम् -

प्राचीनमते **ग्रामं गच्छती**त्यादि नञसमभिव्याहारस्थले द्वितीयार्थः संयोगस्य धात्वर्थव्यापारे (गमने) जनकता सम्बन्धेन एवं **ग्रामं त्यजती**त्यत्र द्वितीयार्थविभागस्य धात्वर्थव्यापारे जनकतासम्बन्धेन अन्वयः। अतः **ग्रामं न गच्छती**त्यादि नञसमभिव्याहरस्थले तु जनकतासम्बन्धावच्छिन्नप्रतियोगिताकाभावः बोधनीयः। ग्रामसंयोगस्य जनकतासम्बन्धावच्छिन्नप्रतियोगिताकाभावः गमने (व्यापारे) बोधनीयः। **ग्रामं न त्यजती**त्यादौ ग्रामविभागस्य जनकतासम्बन्धावच्छिन्नप्रतियोगिताकाभावः धात्वर्थव्यापारे बोधनीयः। वृत्यनियामकस्य तस्य जनकतासम्बन्धस्य अभावप्रतिगोतावच्छेदकत्वाभावात् जनकतासम्बन्धावच्छिन्नप्रतियोगिताकाभावः न प्रसिध्यतीति नञसमभिव्याहारस्थले शाब्दबोधानुपपत्तिः इति अस्वारस्यम्। यदि तत्र जनकत्वादीनां वृत्यनियामकानामपि अभावप्रतियोगितावच्छेदकत्वं कल्प्यते तर्हि तु गौरवम् ।

नव्यमते तु **ग्रामं गच्छती**त्यादि नञसमभिव्याहारस्थले द्वितीयार्थाधेयत्वस्य धात्वर्थतावच्छेदकीभूतसंयोगे स्वरूपसम्बन्धेन अन्वयः। अतः नञसमभिव्याहारस्थले स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावो बोधनीयः। वृत्तिनियामकस्य अस्य स्वरूपसम्बन्धस्य अभावप्रतियोगितावच्छेदकत्वस्य सत्वात् नव्यमते न शाब्दबोधानुपपत्तिः। स्वरूपसम्बन्धस्य अत्र अभावप्रतियोगितावच्छेदकत्वं न कल्पनीयमित्यतः लाघवं च।

---

२. शाब्दबोधमीमांसा, रचयिता – एन्.एस्.रामानुजताताचार्यः, संस्करण सङ्ख्या २००६, राष्ट्रिय-संस्कृत-संस्थानम् – नवदेहली।

३. वैयाकरणभूषणसारः (कौण्डभट्टः) हिन्दी व्याख्याकारः डॉ. चन्द्रिकाप्रसाद द्विवेदी, संस्करण सङ्ख्या २०११, चौखम्बा संस्कृत प्रतिष्ठान ३८ यू. ए. बंगलो रोड, जवाहरनगर दिल्ली ११०००७

४. भाट्टमर्मप्रकाशः रचयिता - डा. सत्यपालसिंहः, संस्करण संख्या – २००३, शिवालिक प्रकाशन, दिल्ली।

५. भाट्टभाषाप्रकाशः, (श्रीमन्नारायणतीर्थः) व्याख्याता-लक्ष्मीनारायणमूर्तिः, संस्करण सङ्ख्या २००५, राष्ट्रियसंस्कृतविद्यापीठम् – वाराणसी।

६. कारिकावली, (श्रीविश्वनाथपञ्चाननभट्टाचार्यः) संपादकः-नारायणसूनुः, संस्करण सङ्ख्या २०१२, चौखम्बा संस्कृत अकादमी – वाराणसी।



 ISSN 0976-8645

वस्तुतस्तु आख्यातस्याश्रयत्वमर्थः। फले व्यापारे च धातोः पृथक् शक्तिः। एकपदोपस्थापितयोरपि परस्परमन्वयो व्युत्पत्तिवैचित्र्यात् । यथा **यजेते**त्यत्र आख्यातोपस्थाप्ययोः कृतिसाध्यत्वेष्टसाधनत्वयोः परस्परमन्वयः तद्वत्। पृथक्शक्तिस्वीकारे **पच्यते तण्डुल** इत्यादौ व्यापारविशिष्टफलबोधेन व्यापारविशिष्टफले शक्यन्तरस्य स्वीकरणीयतया शक्यतावच्छेदकगौरवं च भवति। तदपेक्षया फले व्यापारे च पृथक्शक्तिस्वीकारे शक्यतावच्छेदकलाघवं इत्याहुः। कत्राख्यातस्थले फलं व्यापारे विशेषणम्। कर्माख्यातस्थले फले व्यापारो विशेषणम्। व्यापारजन्यफलाश्रयत्वं कर्मत्वम्। फलजनकव्यापाराश्रयत्वं कर्तृत्वम्।

परे तु धातोः फलव्यापारयोः पृथक्शक्तिस्वीकारे तयोः उद्देश्यविधेयभावेनान्वयापत्तिः। पृथगुपस्थितयोः अर्थयोः उद्देश्यविधेयभावेनान्वयस्य औत्सर्गिकत्वात्। न च **यद्वृत्तयोगप्राथम्ये उद्देश्यतानियामके पश्चात्तद्वृत्तयोगौ विधेयतानियामकौ**, तदभावान्नात्रोद्देश्यविधेयभाव इति वाच्यम्। **प्रथमो भक्षः पण्डितो ब्राह्मण** इत्यादौ तदभावेऽपि उद्धेश्यविधेयभावेनान्वयेन तयोः व्यभिचाराच्च। तस्मात् फलावच्छिन्ने व्यापारे, व्यापारावच्छिन्ने फले च धातूनाम् पृथक् शक्तिः। कर्त्रर्थकप्रत्ययसमभिव्याहारः धातोः फलावच्छिन्नव्यापारबोधे नियामकः। कर्मार्थकप्रत्ययसमभिव्याहारश्च व्यापारावच्छिन्नफलबोधे नियामकः। शक्यतावच्छेदकगौरवं च प्रामाणिकत्वान्न दोषवहम् इत्याहुः।

## सन्दर्भग्रन्थसूची

१. व्युत्पत्तिवादः, (गदाधरभट्टः) व्याख्याकारः – एन्.एस्.रामानुजताताचार्यः, संस्करण सङ्ख्या २०११, राष्ट्रिय-संस्कृत-विद्यापीठम् – तिरुपतिः।

२. शाब्दबोधमीमांसा, रचयिता – एन्.एस्.रामानुजताताचार्यः, संस्करण सङ्ख्या २००६, राष्ट्रिय-संस्कृत-संस्थानम् – नवदेहली।

३. वैयाकरणभूषणसारः (कौण्डभट्टः) हिन्दी व्याख्याकारः डॉ. चन्द्रिकाप्रसाद द्विवेदी, संस्करण सङ्ख्या २०११, चौखम्बा संस्कृत प्रतिष्ठान ३८ यू. ए. बंगलो रोड, जवाहरनगर दिल्ली ११०००७

४. भाट्टमर्मप्रकाशः रचयिता - डा. सत्यपालसिंहः, संस्करण संख्या – २००३, शिवालिक प्रकाशन, दिल्ली।

५. भाट्टभाषाप्रकाशः, (श्रीमन्नारायणतीर्थः) व्याख्याता-लक्ष्मीनारायणमूर्तिः, संस्करण सङ्ख्या २००५, राष्ट्रियसंस्कृतविद्यापीठम् – वाराणसी।

६. कारिकावली, (श्रीविश्वनाथपञ्चाननभट्टाचार्यः) संपादकः-नारायणसूनुः, संस्करण सङ्ख्या २०१२, चौखम्बा संस्कृत अकादमी – वाराणसी।

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018 ISSN 0976-8645

Paper Received on- 21.09.2018 Paper Published on 01-11-2018

# हिन्दू धर्म के पर्याय वाची शब्द

श्री प्रकाश रंजन मिश्र[231]

---

**मुख्य शब्द–** हिन्दू धर्म, आर्यधर्म, सनातन धर्म ।

---

## सारांश

बहुसंख्यक भारतीयों से सम्बन्धित इस हिन्दू धर्म के (१) आर्यधर्म (२) सनातन धर्म एवं (३) वैदिक धर्म ये तीन नाम प्राचीन काल में प्रचलित थे तथा आज भी इनका यदा कदा प्रयोग उसी हिन्दूधर्म के अर्थ में दिखाई देता है ।

(१) **आर्यधर्म –** सद्गुण एवं सत्कर्म से युक्त आर्यावर्त की प्राचीन भारतीय भौगोलिक सीमा में रहने वाले हिन्दूओं के धर्म को आर्य-धर्म कहा जाने लगा यथा-

**कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन् ।**
**तिष्ठति प्रकृताचारे य: स आर्य इतिस्मृत: ॥**[232]

अर्थात् जो मनुष्य स्वेच्छा से कर्यव्य का आचरण करता है एवं अकार्य (न करने योग्य कार्य) नहीं करता तथा जो सहज भाव से प्राकृतिक आचरण में स्थिर रहता है वह आर्य है ।

(२) **सनातन धर्म –** सनातन (अनादि) काल से प्रवर्तमान होने की मान्यता के कारण इसे "सनातन धर्म" कहा जाता है । महर्षि वाल्मीकि ने सनातन-धर्म की परिभाषा देते हुए कहा है कि उपकारी के प्रति उपकार करना, अर्थात् जिसने कभी उपकार किया हो तो उसके उपकार के बदले प्रत्युपकार करना सनातनधर्म है ।

(ख) मेरुतन्त्र: में – (८ वी. शताब्दी) –

---

[231] शोधछात्र, श्री सोमनाथ संस्कृत युनिवर्सिटी , वेरावल, ( गुजरात )
[232] द.भा. संस्कृति-पृ.१५, डॉ. कुवरलाल व्यासशिष्य ।



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018 ISSN 0976-8645

**हिन्दूधर्मप्रलोप्तारो जायन्ते चक्रवर्तिन: ।**
**हीनं च दूषयत्येव हिन्दूरित्युच्यते प्रिये ॥**

अर्थात् शक,हूण आदि चक्रवर्ती राजा हिन्दू धर्म का नाश करनेवाले हैं । जो हीन-नीच या दुष्ट को दोष देता है वही हिन्दू है । उपर्युक्त उदाहणों से यह बात तो स्पष्ट हो ही जाती है कि चाहे यह शब्द अति प्राचीन हो या न हो हिन्दूधर्म सिन्धु धर्म के रुप में आर्यधर्म के रुप में या वैदिक धर्म के रुप में या हिन्दूओं की जीवन पद्धति के रुप में हिन्दू धर्म प्रागैतिहासिक काल में प्रसिद्ध रहा हो लेकिन विश्व के मनीषियों ने इस हिन्दूधर्म को विश्वप्रसिद्ध तीन प्राचीनतम धर्मों (हिन्दू धर्म,पारसी धर्म एवं यहूदी धर्म) में से एक प्रमुख धर्म माना है ।[233] "Hinduism is the original original religion of the Indians it is the oldest of all living religions of the world-Dharmdeo N.singh अत: अब यह सर्वप्राचीन हिन्दूजाति द्वारा अंगीकृत धर्म है ।

(क) श्रेष्ठ और उत्तम लोगों का आवास: विशेषत: वह भूमि जो पूर्वी समुद्र से पश्चिमी समुद्र तक फैली हुयी है तथा जिसके उत्तर में हिमालय एवं दक्षिण में विन्ध्य पर्वत है ।

**आसमुद्रात्तु वै पूर्वादासमुद्राच्यपश्चिमात् ।**
**तयोरेवान्तर गिर्यो: आर्यावर्तं विदुर्बुधा: ॥**[234]

यथा- **"कृते च प्रति कर्तव्यमेष धर्म: सनातन:"**[235] अर्थात् यह उपकार की प्रवृत्ति हिन्दुओं में सदा से चली आरही है । इसका तात्पर्य यह नहीं समझना चाहिए कि जो हमारा उपकार न करे उसका उपकार हम न करें बल्कि तात्पर्य यह है कि सभी जीवों के प्रति एवं मानवों के प्रति तो हमे अपने सामान्यधर्म के अनुसार सदाशयता एवं कल्याण का भाव रखना ही चाहिए इस के अतिरिक्त विशेष रुप से उन जीवों एवं लोगों के प्रति हमें उपकारी होना चाहिए जिन्होंने कभी हमारा उपकार किया है । यही सनातन धर्म से प्रसिद्ध हिन्दू धर्म का सहज स्वरुप है ।

(३) **वैदिक धर्म –** हिन्दू धर्म के अनुयायियों की वेद में आस्था होने के कारण हिन्दू धर्म को ही वैदिकधर्म भी कहते है । वस्तुत: वैदिक धर्म वैदिक – कर्मकाण्ड (वैदिक यज्ञों के अनुष्ठान)

---

[233] द्रा.
[234] मनुस्मृति-२/२२
[235] वा.रा.सु. काण्ड १/११३

वेदानुसार संस्कार एवं वेदोक्त जीवनदर्शन पर निर्भर करता है। हिन्दूओं का इन धार्मिक इकाईयों में पूर्ण आस्था होने के कारण उसी हिन्दू धर्म को यदा कदा वैदिक धर्म भी कहाजाता है।

इन उपर्युक्त नामगत विशेषतओं के आधार पर हिन्दू धर्म का सामान्य लक्षण यह हुआ कि हिन्दु धर्म वह है जिसके अनुशीलन करने वाले भारतवर्ष के निवासी है वेदों के प्रति निष्ठा रखते है एवं धर्म की अनादिता या सनातनता में विश्वास करते है इन्ही विशेषताओं को अन्य शब्दों में यों व्यक्त किया गया है-

**प्रामाण्यबुद्धिर्वेदेषु साधनानामनेकता।**
**उपास्यानामनियमाच्चैतद्धर्मस्य लक्षणम्॥**

अर्थात् हिन्दू धर्म का लक्षण है वेदों को प्रमाण मानना।

(क) **"यागादिरेव धर्मः"**[236] अर्थात् यज्ञ इत्यादि वैदिक कर्मो का अनुष्ठान करना ही धर्म है। श्रौत. एवं स्मार्त भेद से वैदिक यज्ञों को दो भागों में विभक्त माना जाता है। श्रुति कहते है वेद को एवं श्रुति से सम्बन्धित यज्ञो का श्रौत याग कहते है। लेकिन श्रौत याग उन वैदिक यागों के अर्थ में रुढ माना जाता है जिन में "अश्वमेध" इत्यादि यज्ञों की गणना होती है। अब ऐसे श्रौतयागों का अनुष्ठान नहीं होता। लेकिन स्मार्त यज्ञों में कुछ यज्ञों का अनुष्ठान हिन्दू समाज में आज भी होता है जिन यज्ञों में विवाह इत्यादि संस्कार रुप यज्ञो की गणना होती है। हिन्दूओं के संस्कारों को वर्णन गृह्यसूत्रों धर्मसूत्रो,स्मृतियों एवं पुराणों में प्राप्त होते है।

लक्ष्य (ब्रह्म प्राप्ति) तक पहुंचने के लिए साधनों की अनेकता को स्वीकार करना एवं उपास्य के सम्बन्ध में भी किसी नियम विशेष को न मानना। इस अनेकता का तात्पर्य मर्यादाहीनता या स्वेच्छाचार नहीं है प्रत्युत् हिन्दू धर्म में साधन (उपासना पद्धति) की अपेक्षा

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

साध्य (लक्ष्यभूत ब्रह्म प्राप्ति) पर अधिक बल दिता गया है; क्योंकि एक (ब्रह्म रुपी या परमेश्वर रुपी) गन्तव्य स्थान तक पहुंचने के लिए अनेक (उपासना वाले) मार्ग हो सकते है।

(१) यहाँ लक्ष्य एवं साधन का तात्पर्य यह है कि संसार में जिस प्रकार अपने गन्तव्य स्थान तक पहुंचने के छोटे बडे सभी तरह के मार्ग होते है ; उसी प्रजार हिन्दू धर्म के विषय् में भी व्यक्ति को यह समझना चाहिए कि शास्त्रों में निर्दिष्ट अनेक प्रकार के वैष्णव,शैव,शाक्त इत्यादि धार्मिक सम्प्रदायों की पुजा पद्धतियों में से किसी भी पूजापद्धति द्वारा किसी भी विष्णु,शिव या शक्ति

236 लौ.भास्कर (अर्थसंग्रह)





(दुर्गा) की श्रद्धापूर्वक उपासना के माध्यम से उसी एक सर्वेश्वर, परब्रह्म की प्राप्ति हो सकतीं है। इन साधनरुप उपासना पद्धतियों में कोई विरोध नहीं है बल्कि मानवीय बोद्धिक स्तर एवं उपासना की अनुकूलता की दृष्टि से साधनों एवं उपास्य उपासना के लायक अपने इष्ट देव को चुनने के लिए उपासक स्वतंत्र है। उस पर किसी देव विशेष की उपासना करने के लिए धर्म शास्त्र किसी प्रकार का दबाव डालने का नियम नहीं बनाता। यह उपासकों एवं धार्मिक प्रवृत्ति वाले लोगों की अभिरुचिपर निर्भर है कि किस देव विशेष को इष्ट मानकर या उसे परमेश्वर मानकर किस साधन रुप उपासना पद्धति से एकाग्रचित्त होकर उस देव की उपासना करता है। आचार्य पुष्पदन्त महिम्नस्तोत्र में भगवान् शिव की स्तुति करते हुए कहते है विभिन्न उपासनामार्गों में से कोई वेद को कोई सांख्य को कोई शैवमार्ग को तो कोई वैष्णव मार्ग को "यही उत्तम मार्ग है" "यही उत्तम मार्ग है" ऐसा कहता है।

लेकिन मनुष्यों को रुचि को विविधता के कारण ऐसा कहने वाले उन सभी सरलमार्ग या कठिन मार्ग को अपनाने वाले (सरल या कठिन उपासना पद्धतियों को अपनाने वाले) मनुष्यो का एक मात्र लक्ष्य हे शिव तुम्हे प्राप्त करना होता है, जैसे सभी नदियों के जल का प्राप्य एक मात्र समुद्र होता है –

**त्रयी सांख्यं योग: पशुयतिमतं वैष्णवमिति**
**प्रभिन्ने प्रस्थाने परमिदमद: पथ्यमिति च।**
**रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां**
**नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥**[237]

इस तरह से हमारे हिन्दू-धर्म के पर्यावाची शन्दों पर विचार विमर्श किये गये है।

**सहायकग्रन्थसूची**

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in


- द.भा. संस्कृति-, डॉ. कुंवरलाल व्यासशिष्य, विद्यानिधि- प्रकाशनम्, दिल्ली, 1992
- दशरूपकम् (मालवीयः सुधाकरः, चौखम्बा कृष्णदास अकादमी,वाराणसी, 2015
- अर्थसंग्रहः, लौगाक्षिभाष्करः, मोतीलाल बनारसीदास, वाराणसी, 2012
- अलंकारशास्त्रस्येतिहासः प्रो.केतकीनायकः,सांविदीप्रकाशनम्, पुरी |
- रसगंगाधरः मिश्रः नारायणः,झा शशिनाथः, चौखम्बा प्रकाशनम्,वाराणसी


237 त्रयी. वेदत्रयी (ऋग्, यजु,साम)। अर्थात् वेदोक्त कर्मकाण्ड मार्ग इति।

Paper Received on- 14.06.2018 Paper Puolished on 01-11-2018

# पंजाबीभाषायाः परिरक्षणे परिसंवर्धने च संस्कृतस्यावदानम्

पुष्पेन्द्र जोशी[238]

---

**मुख्यशब्दः** – भाषा, पंजाबी, स्त्रियः ।

---

शोधसारः

कस्यापि देशस्य प्रदेशस्य राज्यस्य वा सर्वविधविकासाय भाषाया अतीव महत्त्वं वर्तते यतोहि भाषयैव देशः प्रोन्नतिमाप्रोतीति। भाषा एव एतादृशः सशक्तः माध्यमोऽस्ति येन सर्वविधज्ञानस्य प्रकटीकरणं कर्तुं शक्यते। अतः भाषायाः परिरक्षणं परिसंवर्धनं च सर्वदैव अत्यन्तमावश्यकं भवति। अत्र विवेचनीयमस्ति यत् पंजाबराज्यस्य अद्यत्वे का भाषा प्रामुख्येन प्रयुज्यमाना विद्यते। अनया भाषया साकं संस्कृतस्य कीदृशस्सम्बन्धः परिलक्ष्यते। कथं संस्कृतावदानेन पंजाबीभाषायाः परिरक्षणं परिसंवर्धनं च सम्भवेत्। अस्मिन्नैव सन्दर्भे यद्यत्र इतिहासं परिशीलयामश्चेत् दृष्टिपथमायाति यत् पुरा पंजाबप्रदेशस्य नाम सप्तसिन्धुरासीत् तदानीं प्रदेशस्यास्य भाषा नूनमेव संस्कृतमासीत्। परञ्च यदा अस्य नाम पञ्जाब अभवत् तदा अस्य भाषाऽपि 'पंजाबी' सञ्जातेति।[1]

पंजाबी भाषायाः स्वरूपविषयकं विदुषां मतमिदं सुदृढमस्ति यत् अस्याः भाषायाः यद् रूपमिदानीं दृश्यते तदेव रूपम् वैदिककाले पाणिनिकाले वा आसीत् इति तु स्पष्टतया वक्तुं न शक्यते। इदं तु स्पष्टमस्ति यत् वैदिक संस्कृतेऽपि त्रिसहस्रवर्षेभ्यः बहुविधपरिवर्तनानि जातानि स्युः। पुरा इतिहासे पंजाबीभाषायाः बहूनि नामानि प्रचलितानि आसन्। सर्वप्रथमस्तु भाषेयम् 'सप्तसिन्धु' नाम्ना प्रख्याता आसीत् किंचिद् कालानन्तरं अनया भाषया 'गान्धारी बोली' नाम्ना प्रसिद्धिराप्ता। काव्यशास्त्रग्रन्थेषु अस्याः नाम 'बाह्लीकी' वा 'वाहीकी' अपि प्राप्यते।[2] अत्र पंजाबीभाषेतिहासविषयकं डा. श्यामदेवपाराशर महोदयस्य वचनमिदमत्यन्तं महत्त्वपूर्णमस्ति यत्-

'पंजाबी नूनमेव तस्य भूप्रदेशस्य भाषा विद्यते यत्र ऋषिभिरुच्चारिताः पवित्रमन्त्राः वियति गुंजायमानास्सन्ति। अयमेव सः प्रदेशः यत्र शतद्रुनद्याः सकाशं विस्तृतो भू-भागो बभूव यत्र पाणिनेः सदृशः वैय्याकरणः जन्म प्राप्तवानिति। अतः मतं मे इदं प्रवर्तते यत् वेदानां भाषा एव पंजाबीजनानां सम्पर्कभाषासीत्"।[3] पंजाबप्रदेशः 'वेदभूमिः' इति नाम्नाप्युच्यते| अत्रत्यानां भारतीयानां वैदेशिकानां च सुदृढं मतमस्ति यत् वेदानां रचना तु अस्यामेव भूमौ बभूव। वेदानां रचनाविषयकमिदमन्यतमं प्रमाणं लभते यत् अत्रत्यानां जनानां नामसु 'इन्द्रः' इति शब्दः अग्रे-पृष्ठे-मध्ये वा प्रयुज्यते यथा नरेन्द्र-इन्द्रमोहन-प्रीतेन्द्रसिंह-इत्यादयः शब्दाः। तत्र इतोऽपि आश्चर्यमिदमप्यस्ति यदिदानीमस्मिन् राज्ये पुरुषस्य स्त्रियः वा नाम स्यात् द्वयोः नामसु 'इन्द्रः' शब्दस्य प्रयोगः दरीदृश्यते। इत्यनेन संसिद्धं जायते यत् कथं वैदिकशब्दानां पञ्जाबीभाषोपरि प्रभावस्संलक्ष्यते। अतः इत्थमेव बहुत्र पंजाबीसंस्कृतयोरनयोः भाषयोः ईदृग्गहनतमं सम्बन्धमवलोकयितुं शक्नुमः।

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

[238] संस्कृत व पालि विभाग, पंजाबी विश्वविद्यालय, पटियाला (पंजाब) भारत।





"पंजाबीभाषायाः रूपं सूक्ष्मतया परिशीलयामश्चेत् स्पष्टं जायते यद् अद्यापि भाषेयं वैदिकसंस्कृतस्य प्रतिनिधित्वं करोति। अस्य पृष्ठे कारणमिदं प्रतिभाति यत् आधुनिकपंजाबी (इण्डो-पाक पंजाबी) एतादृशे विशाले प्राचीने अस्मिन्नैव भू-खण्डे भाषेयं प्रसिद्धिः लब्धा आसीत्। अस्यामेव भूमौ ईसातः सहस्रवर्षाणि पूर्वं भारतीय-आर्यभाषापरिवारस्य बीजांकुरः विकसितः प्रफुलितश्च बभूव। यत्र अस्याः भाषापरिवारस्य प्रथमप्राचीनवैदिकसंस्कृतस्योत्थानं जातमासीत्"।[4]

निस्सन्देहेन पंजाबीभाषायाः वंशपरम्परा ऐतिहासिक-भौगोलिकदृष्ट्या वैदिकसंस्कृतसम्बद्धो लक्ष्यते। पंजाबी भाषायाः विदुषां डा. प्रेमप्रकाशमहोदयानां मतानुसारं पंजाबीभाषायाः इतिहासविषये प्रामुख्येन द्वौ पक्षौ स्तः। एकस्तु पुरेतिहासः (pre-history) पूर्वेतिहासश्च(proto-history) वर्तते। द्वितीयस्तु लिखितेतिहासोऽस्ति (documented-history)।[5] तेषां मतमस्ति यत् Thomas pyls & john algeo महोदयाभ्यां आंग्लभाषायाः प्राक् इतिहासविषये यल्लिखितमस्ति तथैव पंजाबीभाषोपरि घटितं भवति। " आंग्लभाषायाः लिखितालेखैः प्रामाणिकेतिहासः अनुमानतः 700 ईसातः प्रारभते परञ्च वयम् आंग्लभाषायाः किंचित् पुरेतिहासः इतः पूर्वं (4000 B.C) पर्यन्तमपि पुनः स्रष्टुं शक्नुमः"।[6] अत्र विवेचनीयमस्ति यत् कथं संस्कृतावदानेन पंजाबी भाषायाः परिरक्षणं परिसंवर्धनं च सम्भवेतिति। पंजाबीभाषा भारोपीयपरिवारस्यान्यतमा भाषाऽस्ति।[7] भारोपीयभाषाणामुपरि संस्कृतस्यातीवप्रभावस्संलक्ष्यते। इदन्तु ऐतिहासिकं तथ्यमस्ति यत् भारोपीयपरिवारस्य अन्वेषणे स्थापनायां च संस्कृतस्याप्रतिमोपलब्धिरियमस्ति यत् महान् वैज्ञानिकः sir William jones महोदयः यदा भाषाविषयकं स्वकीयं निर्णयं सर्वेषां पुरुतः उपस्थापितवान् यत् भारतवर्षस्यास्य संस्कृतभाषा लैटिन-ग्रीक-जरमेनिक-कैलटिक-इत्यादिभिः आनुवंशिकतया सम्बद्धमवधारयति। तदैव भाषाविज्ञानक्षेत्रेषु नवीना क्रान्तिरेव प्रसृतेति। अत्र अधोलिखिततालिकायां भारोपीयभाषाणां परस्परं सम्बन्धं स्पष्टतया अवलोकयितुं शक्यते।[8]

तालिका[9]-1

| english | gothic | Latin | Greek | slavic | sanskrit | punjabi | hindi |
|---|---|---|---|---|---|---|---|
| One | ains | unus | heis | Jedinu | एक | ਇਕ | एक |
| two | twai | duo | duo | Duva | द्वौ | ਦੋ | दो |
| three | thrijaacc. | tres | treis | Trije | त्रय | ਤਿਨ | तीन |
| four | fidwor | quattuor | tettares | Cetyre | चत्वार | ਚਾਰ | चार |
| five | fimf | quinque | pente | Peti | पञ्च | ਪ□ਜ | पाँच |
| six | saihs | sex | heks | Sesti | षट् | ਛੇ | छः |
| seven | sibun | Septem | hepta | Sedmi | सप्त | ਸਤ | सात |
| eight | ahtau | Octo | okto | Osmi | अष्ट | ਅਠ | आठ |
| nine | niun | novem | ennea | Deveṭi | नव | ਨੌ | नौ |
| ten | taihun | decem | deka | deseti | दश | ਦਸ | दस |

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

तालिका-2

| greek | Latin | slavic | gothic | german | english | sanskrit | punjabi |
|---|---|---|---|---|---|---|---|

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018

भवितुमर्हति। यथा- 'कन्वोकेशन' इत्यस्य प्रायः पंजाबीभाषायामनुदितः शब्दोऽपि 'ਕਂਨਵੋਕੇਸ਼ਨ' एव विलिख्यते यद्यपि पंजाबीभाषायामेव अस्य कृते द्वौ शब्दौ विद्यमानौ स्तः। एकस्तु 'ਦੀਖਿਆ' द्वितीयोऽस्ति 'ਅੰਤ' अनयोः द्वोः शब्दयोः दीर्घसन्धिना[32] 'ਦੀਖਿਆਂਤ' इति शब्दः झटिति एव स्त्रष्टुं शक्यते। अनेनैव विधिना निश्चयेन पंजाबीशब्दकोषे शब्दवृद्धिर्भविष्यति। अपितु अस्याः भाषायाः परिरक्षणं परिसंवर्धनं च सम्भवमस्ति। साम्प्रतमत्र संस्कृतपंजाबीभाषयोः रूपात्मकमध्ययनं क्रियते। अत्र नास्ति सन्देहः यत् अनयोः भाषयोः रूपात्मकदृष्ट्या घनिष्ठसम्बन्धोऽस्ति। द्वयोः भाषयोः शब्दसंरचनाकाले शब्दनिर्माणकाले वा एकैव पद्धतिः अनुसर्यते। अत्र द्वयोः भाषयोः शब्दकोषस्य तुलनात्मकाध्ययनाय इयं अनिवार्यता वर्तते यत् द्वयोः स्थानयोः सैव शब्दावली प्रयोक्तव्या या मूलभाषायाः स्यात्।[33] अस्मिन्नैव विषये हॉक महोदयः कथयति-

"Evidence for possible genetic relationship this should consist of Correspondences which pervade the vocabulary and which include most of tha basic vocabulary."[34]

संस्कृतस्य शब्दे प्रायः धातुः उपसर्ग, प्रत्ययः विभक्तिप्रत्ययश्च वर्तते। इत्थमेव पंजाबीशब्दावल्याः संरचनाविषयकं विश्लेषणं कुर्मः चेत् अस्याः भाषायाः प्रक्रियापि संस्कृतवदेव प्रतीयते। उदहरणार्थं पंजाबीभाषायाः- 'ਕਰਤਾ ,ਦੋਹਤਰਾ, ਪਿਤਾ, ਪਾਣੀ, ਕੁਲਹਿਣੀ' इत्यादीन् शब्दान् स्वीकर्तुं शक्नुमः। अत्र अधः प्रस्तुतपंजाबीशब्दानामान्तरिकसंरचनाविषयकतालिकायाः अध्ययनेन सिद्ध्यते यत् संस्कृतेन साकं रूपात्मकदृष्ट्या पंजाबीभाषायाः घनिष्ठतमस्सम्बन्धोऽस्ति।

पंजाबीशब्दानामान्तरिकसंरचना [35] (तालिका-3)

| ਅਰਥੀਮ lexeme | ਅਗੇਤਰ prefix | ਧਾਤੂ/ਮੂਲਾਂਸ Root/stem | ਪਿਛੇਤਰ Suffix | ਵਿਭਕਤੀ Inflection | ਵਿਆਕਰਣ ਸ਼੍ਰੇਣੀ | ਮੂਲ-ਤਤਸਮ |
|---|---|---|---|---|---|---|
| ਕਰਤਾ | | ਕਰ-(ਕ੍ਰਿ-ਕਰਨਾ) | ਤਾ- (ਤ੍ਰਿ) | | ਪੁਲਿ□ਗ ਨਾਂਵ | कर्ता |
| ਵਿਜੋਗੀ | ਵਿ- | ਜੋਗ-(ਯੁਜ-ਜੋੜਣਾ) | ੀ- (ਇਨ) | | ਵਿਸ਼ੇਸ਼ਣੀ ਨਾਂ | वियोगी |
| ਘਰੋਂ | | ਘਰ-(ਗ੍ਰ- ਗ੍ਰਹਿਣ ਕਰਨਾ) | | ਉ | ਪੁਲਿ□ਗ ਨਾਂਵ | गृहात् |
| ਕੋਸੀ | ਕੋ-(ਕੁ) | ਸ-(ਉਸਣ- ਗਰਮ ਹੋਣਾ) | ੀ- (ਬਿਹਾਰੀ) | | ਇ ਲਿ□ਗ ਨਾਂਵ | कवोष्ण |
| ਪਾਣੀ | | ਪਾ- (ਪਿਬ-ਪੀਣਾ) | ਣੀ-(ਨੀਜ) | | ਪੁਲਿ□ਗ ਨਾਂਵ | पानीय |
| ਕਲਹਿਣੀ | ਕ-(ਕੁ) | ਲਹਿਣ-(ਲਛਣ-ਲਕਸਣ) | ੀ- (ਬਿਹਾਰੀ) | | ਇ ਲਿ□ਗ ਨਾਂਵ | कुलक्षणी |
| ਪਿਤਾ | | ਪਿ-(ਪਾ- ਪਾਲਣਾ) | ਤਾ-(ਤ੍ਰਿ) | | ਪੁਲਿ□ਗ ਨਾਂਵ | पिता (पितृ) |
| ਖਾਣਗੀਆਂ | | ਖਾ-(ਖਾਦ- ਖਾਣਾ) | ਣ- (ਬਹੁ-ਵਚਨ) ਗ- (ਭਵਿਖਵਾਚੀ) | ਇਆਂ | ਕ੍ਰਿਆਵੀ ਰੂਪ | |

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

वैदिकशब्दानां पंजाबीभाषोपरि प्रभावः-

कस्यामपि भाषायां शन्दानामतीव महत्त्वं वर्तते। वैदिकवाङ्मये केचन शब्दाः ईदृशाः सन्ति सन्ति येषां प्रयोगाः यथा प्राप्यन्ते तथैव लौकिकसंस्कृते न दृश्यन्ते। यथा- ऋग्वेदस्य प्रथमे मन्त्रे



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018

एव 'अग्निमीळे' इत्यस्मिन् शब्दे 'ळ' इति ध्वनेः प्रयोग़ः अधुना लौकिकसंस्कृते न लक्ष्यते परंच पंजाबीभाषायां तु अयं ध्वनिः अद्यापि प्रयुज्यते। इतोऽपि अस्मिन्नैव मन्त्रे समागताः शब्दाः पुरोहित- यज्ञ-देव-रत्न- इत्यादयः पंजाबीभाषायां अधुनाऽपि प्रयुज्यन्ते। परंच केचन तु एतादृशाः विलक्षणशब्दाः वेदेषु प्राप्यन्ते येषां किंचिद रूपपरिवर्तनं कृत्वा अधुनापि अस्यां भाषायामुपलभ्यन्ते। वेदेषु पंजाबीभाषायां च प्राप्तैः शब्दैरिदं तु सिद्धयते यत् अनयोः द्वयोः भाषयोः परस्परं घनिष्ठतमस्सम्बन्धोऽस्ति। अत्र तादृशाः वैदिकशब्दाः प्रस्तूयन्ते येषां प्रयोगः पंजाबीभाषायां क्रियते।[36]

पंजाबीभाषायामाप्ताना वैदिकशब्दानां तालिका-(4)

| मूलपंजाबीशब्दाः | संस्कृतशब्दाः | हिन्दी अर्थ |
|---|---|---|
| 1. अक्कणा (अकाऊ, अकाउ, अकेवां) | वै. (अकम्) | तंग होना, थकना |
| 2. अणजाण | अनाजानत् (अथर्ववेद) | अज्ञानी |
| 3. इद्दां | इत्था/इत्थम् | इस तरह |
| 4. उद्दां | अमुथा | उस तरह |
| 5. कलपणां | कृप् (धातु) | दुखी होकर बोलना |
| 6. चात्वा | तात्यः | पिता का छोटा बेटा |
| 7. जित्त | जित्या | विनय |
| 8. तुरना | तुरत्/त्वरण/त्वर | चलना |
| 9. पल्ली | पल्य | बोरी |
| 10. रुख | रूक्ष | वृक्ष |

पंजाबीभाषायां वाक्यप्रयोगः -

1 ਉਸ ਨੂੰ ਸਾਰਾ ਦਿਨ ਖੇਤ 'ਚ' ਕੰਮ ਕਰਦਿਆਂ ਅਕੇਵਾਂ ਆ ਗਿਆ।

2 ਕਦੇ ਵੀ ਅਣਜਾਣ ਵਿਅਕਤੀ ਕੋਲੋਂ ਖਾਣ ਵਾਲੀ ਵਸਤੂ ਨਾ ਲਵੋ।

3 ਜੇ ਉਹ ਇਦਾਂ ਕਰਦਾ ਤਾਂ ਜਰੂਰ ਆਪਣੀ ਮੰਜਿਲ ਤੱਕ ਪਹੁੰਚ ਸਕਦਾ ਸੀ।

4 ਵਿਦੇਸ਼ ਬੇਠੇ ਪੁੱਤਰ ਦੀ ਸੋਚ ਵਿੱਚ ਮਾਂ ਸਾਰਾ ਦਿਨ ਕਲਪੀ ਜਾਂਦੀ ਹੈ।

5 ਸਾਡਾ ਚਾਚਾ ਦਿਪਾਵਲੀ ਨੂੰ ਮਿਠਾਇਆਂ ਲੈ ਕੇ ਆਉ।

उपर्युक्तेषु रेखांकितवाक्येषु नूनमेव वैदिकसंस्कृतस्य प्रभावो द्रष्टुं शक्यते। अनेनैव विधिना अन्यवैदेशिकशब्दानामध्ययनं कृत्वा पंजाबीभाषायां नवीनशब्दान् स्त्रष्टुं शक्नुमः येन अस्याः भाषायां शब्दकोषे निस्सन्देहेन वृद्धिर्भविष्यति। पंजाबीभाषायां 'लेट्' लकारस्य प्रयोगः अद्यापि क्रियते यद्यपि लौकिकसंस्कृते लकारस्यास्य प्रयोगः न विधीयते।

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

अत्र सारण्यामवलोकयितुं शक्नुमः–

| पंजाबीशब्दाः | वैदिकसंस्कृतशब्दाः | वैदिकसंस्कृतशब्दाः | पंजाबीशब्दाः |
|---|---|---|---|
| 1.गच्छसी | 1.गच्छसि | करन् | ओह करण |
| 2.जासी | 2.यासि | भरन् | भरण |
| 3.करसी | 3.कराहि | वरन् | वरण |
| 4.होसी | 4.भवासि | चरान् | चरन |

वैदिकसंस्कृतस्य प्रवृत्तिः नूनमेव पञ्जाबीभाषायां द्रष्टुं शक्यते। वैदिकशब्दानां बह्व्यः विविधपरम्पराः अद्यापि अस्यामेव पञ्जाबीभाषायां दरीदृश्यन्ते। यथा वेदेषु दत्तः इत्यत्र दकारस्य लोपः जायते स्मः यथा- प्रदत्त, अवदत्त, देवदत्त, इत्यादीनां क्रमेण प्रत्त अवत्त देवत्त रुपाणि

[A First International Electronic Peer-reviewed Quarterly Refreed **UGC Approved** (41039 ) Sanskrit Tri-lingual Journal with **Impact Factor**]
**Available at-** www.jahnavisanskritejournal.in **Issue**-34th & 35th , **Year** 09, **Vol** -III, 01 **November, 2018** ISSN 0976-8645

जायन्ते। इयमेव प्रवृत्तिः साम्प्रतमपि पञ्जबीभाषायामवलोकयितुं शक्नुमः यथा- सम्स्कृते ' दत्तः' भवति तथैव पञाबीभाषायां 'दित्ता' भवति। संस्कृते यदि दत्तः इत्यत्र दकारस्य लोपः वर्तते तर्हि पञ्जाबीभाषायां दित्ता इत्यत्र 'दि' इत्यस्य लोपः जायते। उदाहरणार्थमत्र

केचन एतादृशः पञ्जाबीशब्दाः प्रस्तुयन्ते यत्र इयमेव प्रवृत्तिः संलक्ष्यते। यथा- कर दित्ता- करत्ता, खुला दित्ता- खुलात्ता, चला दित्ता- चलात्ता, दे दित्ता- देत्ता, पा दित्ता- पात्ता, इत्यादयः।(पारा.163)[37]

पंजाबीभाषोपरि संस्कृत-उपसर्गाणामत्यधिकप्रभावस्संलक्ष्यते। संस्कृतभाषायाम् उपसर्गाणामतीव महत्त्वं विद्वद्भिः प्रतिपाद्यते। लौकिकसंस्कृते उपसर्गाणां संख्या द्वाविंशतिः वर्तते।[38] उपसर्गाणां विषये वैदिकलौकिकसंस्कृतयोः किंचिद् अन्तरं दृश्यते। लौकिकसंस्कृते। लौकिकसंस्कृते उपसर्गाणां प्रयोगेण अर्थपरिवर्तनं संजायते। यथा- 'भवति' इति पदेन 'अनु' उपसर्गं संयोजयामश्चेत् अस्यार्थः भवति 'अनुभवति' परंच अनेनैव पदेन यदि 'परा' उपसर्गं योजयामश्चेत् अस्यैवार्थः पराजयमिति जायते। अनेनात्र सिद्ध्यति यत् उपसर्गाणां प्रयोगेण धातोः मूलार्थे परिवर्तनं भवति। परंच कदाचित् अर्थे परिवर्तनं न भवति यथा- 'आप' धातोः 'प्र' इति उपसर्गयोजनेन 'प्राप्नोति' इति पदं ज्ञायते। इत्यत्र अर्थे परिवर्तनं न भवति। परंच वैदिकसंस्कृते उपसर्गाणां द्विविधः अर्थः भवति। एकस्तु स्वतन्त्रार्थः, द्वितीयस्तु पदेनसंयोज्यापि दरीदृश्यते। संस्कृतसंभाषणे लेखने वा उपसर्गाणाम् उपयोगित्वं तु निस्सन्देहेन अवलोकयितुं शक्नुमः।

पञ्जाबीभाषायामुपसर्गाणां स्थाने 'अगेतर' इति शब्दः प्रयुज्यते। अत्र द्वयोः भाषयोः उपसर्गाणां तुलनासारणी प्रस्तूयते। अस्मिन् पत्रे पञ्जाबीसंस्कृतयोः उपसर्गाणां 'तुलनासारणी' प्रदर्शनस्योद्देश्यमिदमस्ति यत् पञ्जाबीभाषायाम् इतोऽपि एषां प्रयोगः वर्धेत। अनेन पञ्जाबीभाषायाः शब्दकोषे वृद्धिरपि भविष्यतीति। यतोहि तत्र तस्यां भाषायां सम्भावना सामर्थ्यंश्चापि वर्तते।

संस्कृतपञ्जाबीभाषयोः उपसर्गाणां तुलनासारणी [39]

| संस्कृत-उपसर्गाः | पञ्जाबी-उपसर्गाः | सोपसर्गसंस्कृतशब्दाः | सोपसर्गपञ्जाबीशब्दाः |
|---|---|---|---|
| अभि- | ਅਭਿ/ਅਭ- | अभिमान, अभिलाषा, | ਅਭਿਮਾਨ, ਅਭਿਲਾਖਾ, ਅਭਿਆਗਤ |
| अति- | ਅਤ/ਅਤਿ- | अभ्यागत | ਅਤਕਥਨੀ/ਅਤਿਕਥਨੀ |
| अति- | ਅਤਿ- | अतिकथन, अतिशयोक्ति | ਅਤਿਆਚਾਰ |
| अधि- | ਅਧਿ- | अत्याचार | ਅਧਿਆਪਕ, ਅਧਿਆਤਮ |
| अनु- | ਅਨ/ਅਨੁ- | अध्यात्मक, अध्यात्म | ਅਨਸਾਰ/ਅਨੁਸਾਰ/ਅਨੁਮਾਨ |
| अप- | ਅਪ- | अनुसार, अनुमान, | ਅਪਜਸ, ਅਪਮਾਨ |
| अव- | ਔ-ਅਵ- | अपयश, अपमान | ਔਗਣ, ਔਉਤਾਰ/ਔਤਾਰ |
| आ- | ਆ- | अवगुण, अवतार | ਆਉਣਾ, ਆਖਣ |
| उत्- | ਉ- | आगमन आख्यानं | ਉੱਸਰਨਾ, ਉਘਾੜਨਾ |
| उत्- | ਉਤ੍- | उत्सारणं, उद्घाटानं | ਉਤਰਨਾ |
| उप- | ਉਪ- | उत्तरणं | ਉਪੱਦਰ |
| उत्- | ਉਕ੍- | उपद्रव\ | ਉੱਖੜਨਾ (ਉਕਖੜਨਾ) |
| उत्- | ਉਲ- | उत्खननं | ਉਲੀਕਣਾ |
| दुर्- | ਦੁਰ੍- | उल्लेखनं | ਦੁਰਗਤ, ਦੁਰਦਸ਼ਾ |
| नि- | ਨ- | दुर्गति, दुर्दशा | ਨਖਿਧ/ਨਿਖਿੱਧ |



[A First International Electronic Peer-reviewed Quarterly Refreed **UGC Approved** (41039 ) Sanskrit Tri-lingual Journal with **Impact Factor**]
**Available at-** www.jahnavisanskritejournal.in **Issue**-34th & 35th , **Year** 09, **Vol** -III, 01 **November, 2018** ISSN 0976-8645

| | | | |
|---|---|---|---|
| निस्- | ਨ- | निषिद्ध | ਨਚੋੜਨਾ, ਨਸ□ਗ, ਨੱਪੁਤਾ |
| निर्- | ਨਿ- | निःशंक, निष्पुत्र | ਨਿਰਾਦਰੀ/ਨਿਆਦਰੀ |
| निर्- | ਨਿਰ੍ | निरादर | ਨਿਰਾਕਾਰ, ਨਿਰ□ਕਾਰ, |
| निस्- | ਨਿਹ੍- | निराकार, निर्दय | ਨਿਰਦਈ |
| निर्- | ਨਿਰ- | निष्पाप, निश्चल | ਨਿਹਪਾਪ, ਨਿਹਚਲ, |
| प्र- | ਪੜ- | निष्कलंक, निश्चय | ਨਿਜਕਲ□ਕ, ਨਿਹਚਾ |
| प्रति- | ਪੜ- | निर्मल, निर्वैर | ਨਿਰਮਲ, ਨਿਰਵੈਰ |
| प्रति- | ਪਿਤਰ- | प्रपौत्र | ਪੜੌਤਾ |
| वि- | ਵਿ- | प्रतिच्छाया | ਪੜਛਾਵਾਂ |
| वि- | ਬੇ- | प्रतिपालक | ਪਿਰਤਪਾਲਕ |
| सम्- | ਸ□ | व्यर्थ, विस्मरण, विकृत | ਵਿਅਰਥ, ਵਿਸਰਨਾ, ਵਿਗੜਨਾ |
| सम्- | ਸਨ- | विनति, विमुख | ਬੇਨਤੀ, ਬੇੱਸੁਖ |
| स- | ਸ- | सम्पूर्ण, सन्तापनं | ਸਪੂਰਨ, ਸਤਾਉਣਾ |
| सु- | ਸੁ- | सम्मुख, सम्मान | ਸਨਮੁੱਖ, ਸਨਮਾਨ |
| कु- | ਕ/ਕੁ- | सचित्र, सलवण, | ਸਚਿਤਰ, ਸਲੂਣਾ, ਸਫਲ |
| अ- | ਅ- | सफल, | ਸੁਵੇਲਾ |
| अन- | ਅਨ/ਅਣ- | सुवेला (वेला-समय) | ਕਵੇਲਾ/ਕੁਵੇਲਾ, ਕੁਚੱਜ, |
| परि- | ਪਰਿ- | कुवेला, कुचर्या, | ਕੁਲੱਛਣੀ |
| | | कुलक्षणी | ਅਲੂਆ□, ਅਲੂਣਾ, ਅਛੂਤ, |
| | | अलोमा, अलवण, | ਅਸੰਖ |
| | | अस्पृश्य, असंख्य | ਅਣਪੜ, ਅਣਮੀਤ, |
| | | अपठित, अस्यूत, | ਅਣਗਿਣਤ, ਅਨੇਕ ਅਣਡਿਠ, |
| | | अगणित, | ਅਣਜਾਨ. |
| | | अदृष्ट, अज्ञान, अनेक | ਪਰਕਰਮਾ, ਪ੍ਰਸਥਿਤੀ |
| | | परिक्रमा, परिस्थिति | |

पञ्जाबीभाषायां 'पिछेत्तर' इति प्रत्ययरूपेण अभिधीयते। अस्यां पञ्जाबीभाषायामतीव प्रभावस्संलक्ष्यते संस्कृतप्रत्ययानाम्। संस्कृते तु प्रत्ययः द्विविधः वर्तते। कृदन्तप्रत्ययः तद्धितप्रत्ययश्च। अत्र स्थालीपुलाकन्यायेन द्वयोः भाषयोः सारिणी प्रस्तूयते येन स्वयं सिद्धो भविष्यति यत् कीदृशः सम्बन्धोऽस्ति परस्परमनयोः द्वयोः भाषयोः इति। अत्र प्रत्ययानां विषये विशेषरूपेण उल्लेखनीयो वर्तते यत् वैदिकसंस्कृतस्य 'त्वन्' इत्यस्य प्रत्ययस्य प्रयोगः दृश्यते यथा- कवित्वन्, जनित्वम् पतित्वन्, महित्वन्, वृषत्वन् इत्यादयः।अस्य प्रत्ययस्य बाहुल्येन प्रयोगः द्रष्टुं शक्यते। तथैव पञ्जाबीभाषायामपि यथा- कुड़त्तण, पलत्तण, पलित्तण, इत्यादयः।[40] अत्र इदमपि स्पष्टीक्रियते यत् प्रत्ययस्यास्यैव प्रयोगः लौकिकसंस्कृते न क्रियते। अस्य स्थाने तल-प्रत्ययस्य[41] प्रयोगः वर्तते।

संस्कृतधातूनां पंजाबीधातूनामुपरि प्रभावाः –

संस्कृतभाषायां धातूनाम् अतीव महत्त्वं वर्तते अत्र आचार्यैरिदमपि मन्यते यत् शब्दकोषस्य (lexicon) मूले कश्चित् धातुस्तु अवश्यमेव विराजते एव। कथनस्याभिप्रायोऽयम् वर्तते यत् शब्दस्य विश्लेषणं कृत्वा तस्मिन् शब्दे कः धातुः प्रयुज्यमानोऽस्ति इति ज्ञातुं शक्नुमः। "संस्कृते धातुरेव केन्द्रभावस्य सूचको भवति। अयं धातुरेव संस्कृतशब्दसंरचनायाः मेरुदण्डरुच्यते (nucleus)"।[42] धातवः कस्यामपि भाषायामात्मारूपेण संस्थिता भवति। यदि भाषातः धातून् निष्कासयामश्चेत् सा भाषा मृतस्य सदृशा चेतनाशून्या गतिहीना च प्रतिभातीति।[43] यास्काचार्यस्तु निरुक्ते धातोः महत्त्वं प्रतिपादयन् नामविषये उक्तवान् यत्

'सर्वाणि नामानि आख्यातजानि' इति।[44] सर्वे प्रातिपदिकशब्दास्तु धातुभिरेव व्युत्पद्यन्ते इत्थं निरुक्तेऽपि धातोः महत्त्वमुपवर्णितमस्ति। पाणिनिना अपि द्वयोः अनयोः सूत्रयोरेव 'भूवादयो धातवः', 'क्रियावाचिनोभ्वादयो धातुसंज्ञा स्युः' धातुविषयकमुपवर्णितमस्ति। संस्कृतपंजाबी-अनयोः द्वयोः भाषयोः शब्दानां मूले धातवरेव सन्ति। पंजाबीभाषायामपि खा, पि, जा, वस, पठ, लिख खेल-इत्यादयः धातवः संस्कृतवदेव संलक्ष्यते । अत्र तालिकायां द्वयोः भाषयोः धातवः प्रस्तूयन्ते। एषां धातूनां प्रदर्शनस्यान्यतममुद्देश्यमिदमप्यस्ति यत् साम्प्रतम् पंजाबीभाषायां केचन धातूनां प्रयोगाः न भवन्ति परञ्च संस्कृते ते धातवः प्राप्यन्ते अतः संस्कृतात् प्राप्तुं शक्नुमः येन अस्याः भाषायाः धातुवृद्धिस्तु नूनमेव भविष्यतीति।

संस्कृतपंजाबीभाषयोः धातूनां तालिका- [45]

| पञ्जाबी-धातवः | संस्कृतधातवः | संस्कृतशब्दरूपाणि |
|---|---|---|
| उसकणा<br>उस्सरना<br>आउणा<br>आखणा<br>हसणा<br>हींघरना<br>खाणा | उत्- श्वस्<br>उत्-सृ<br>आ- गम्<br>आ- ख्या<br>हस्<br>हिङ्- कृ<br>खाद् | उच्छ्वसन<br>उत्सरण<br>आगमन<br>आख्यान<br>हसनम्<br>हिङ्करण<br>खादनम् |

संस्कृतस्य कारकाणां पञ्जाबीभाषोपरि प्रभावः-

संस्कृते कारकाणां संख्या षट् वर्तते। अत्र संस्कृतपञ्जाबीभाषयोः कारकाणि समानरूपेण एव कार्यं कुर्वन्ति। एषां कारकाणां नामानि अपि समानानि एव सन्ति। पञ्जाबीभाषायामपि कारकेषु संस्कृतवत् कानिचनविभक्तिरूपाणि प्रचलन्ति।यथा- उदाहरणार्थमत्र केचन अपादानकारकास्य शब्दाः प्रस्तूयन्ते। ਘਰੋਂ ਮਕ੍ਲੋਂ, ਮੈਥੋਂ ਕੋਠਿਉਂ इत्थमेव अधिकरणस्यापि रूपाणि सन्ति "ਘਰੇ, ਮਕ੍ਲੇ" ਕੋਠੇ अस्मिन्नैव प्रसंगे वाक्यसंरचनाविषये पश्यामश्चेत् दृष्टिपथमायाति यत् संस्कृते वाक्यस्य शब्दक्रमः स्वतन्त्रो विद्यते। परञ्च पञ्जाबीभाषायां असौ नियमो नास्ति। तथापि क्वचित् शब्दस्य स्वतन्त्रक्रमोऽपि दृश्यते। यथा- ਰਾਮ ਘਰ ਗਿਆ ਜਾਂ ਘਰ ਗਿਆ ਰਾਮ इति।[46]

पञ्जाबीभाषायामेकमेव वाक्यं कदाचित् भिन्नरीत्या प्रस्तौतुं शक्यते। यथा अत्र कानिचन वाक्यानि प्रस्तूयन्ते-

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

| | |
|---|---|
| 1. ਉਹ ਇਹ ਗੱਲ ਭੁੱਲ ਗਿਆ। | ਉਹਨੂੰ ਇਹ ਗਲ ਭੁੱਲ ਗਈ। |
| 2. ਕਮਰੇ ਚ ਠੰਡ ਹੈ। | ਕਮਰਾ ਠੰਡਾ ਹੈ। |
| 3. ਉਹ ਅ□ਖਾਂ ਨਾਲ ਘੋਲ ਕੀ ਹੈ। | ਉਹਦੀਆਂ ਅੱਖਾਂ ਬੋਲਦੀਆਂ ਹਨ। |
| 4. ਉਹ ਉਹਤੋਂ ਡਰ ਗਿਆ। | ਉਹਨੇ ਉਹਨੂ□ ਡਰਾਇਆ। |
| 5. ਬੜੇ ਬ□ਦੇ ਇਸ ਤਲਾ ਚ ਡੁੱਬ ਗਏ। | ਇਸ ਤਲਾ ਨੇ ਬੜੇ ਬੰਦੇ ਡੁਬੋਏ। |
| 6. ਉਹਨੇ ਦਿਮਾਗ ਨਾਲ ਇਹ ਸੋਚਿਆ। | (i) ਉਹਨੂੰ ਇਹ ਦਿਮਾਗ ਚ ਸੁਝਿਆ।<br>(ii) ਉਹਦੇ ਦਿਮਾਗ ਨੇ ਇਹ ਸੋਚਿਆ।<br>(iii) ਉਹਦੇ ਦਿਮਾਗ ਨੇ ਉਹਨੂੰ ਇਹ ਸੁਝਾਇਆ। |
| 7. ਉਹਨੇ ਹੱਥਾਂ ਨਾਲ ਸਮਾਨ ਟਰਕ"ਚ ਲਦਿਆ। | ਉਹਦੇ ਹੱਥਾਂ ਨੇ ਸਮਾਨ ਟਰੱਕ"ਚ ਲੱਦਿਆ।<br>ਉਹਦੇ ਹੱਥਾਂ ਨੇ ਸਮਾਨ ਨਾਲ ਟਰੱਕ ਲੱਦਿਆ। |





"इमानि वाक्यानि एकमेवार्थं प्रस्तौतुं विकल्पमुपस्थापयन्ति। एतत् तु वक्तुः घटनाविषयकावधारणोपरि समाश्रितो वर्तते"।[47]

संस्कृते वचनत्रयमस्ति। पञ्जाबीभाषायां वचनद्वयमस्ति इत्थमेव लिङ्गविषयेऽपि पञ्जाबीभाषायां नपुंसकलिङ्गस्याभावो विद्यते। अत्र केवलं लिङ्गद्वमेवास्ति पुलिङ्गः स्त्रीलिङ्गश्च ।संस्कृतपञ्जाबीद्वयोः भाषयोः विशेषणस्य स्थितिः समाना एव वर्तते। कथनस्याभिप्रायमिदमस्ति यत् लिङ्ग-वचन-विभक्तीनामनुसारमेव विशेषणमपि परिवर्तयतीति।

अत्र द्वयोः भाषयोः विशेषणस्य तुलनासारिणी प्रस्तूयते-

| संस्कृतविशेषणानि | पञ्जाबीविशेषणानि |
|---|---|
| 1 रक्तो घटः<br>2 पीता घटी<br>3 नीलं नभः | ਲਾਲ ਘੜਾ<br>ਪੀਲੀ ਘੜੀ<br>ਨੀਲਾ ਆਕਾਸ਼ |

संस्कृतस्य समासानां पञ्जाबीभाषोपरि प्रभावः---

समासप्रयोगस्तु अनयोः द्वयोः भाषयोः क्रियते। पाणिनिना समासस्य परिभाषा प्रदत्ता अस्ति 'समसनमिति समासः'। अत्र निम्नतालिकायां द्रष्टुं शक्यते यत् कथं संस्कृतसमासानामद्यापि पञ्जाबीभाषायां बाहुल्येन प्रयोगाः दरीदृश्यन्ते।

| पंजाबी समास | संस्कृत समास | समासविधायक सूत्र |
|---|---|---|
| ਕਪੜਮਿੱਟੀ<br>ਘੀਸ਼ਕਰ<br>ਕਪੜਾਲੱਤਾ | कर्पटमृत्तिका (द्वन्द्व समास)<br>घृतशर्करा (द्वन्द्व समास)<br>कर्पटलक्तक(द्वन्द्व समास) | "चार्थे द्वन्द्वः"[48] |
| ਪੰਜਰਤਨਾ<br>ਦੁਲੱਤਾ | पंचरत्न (द्विगु समास)<br>द्विलत्ता (द्विगु समास) | "संख्यापूर्वो द्विगुः"[49] |
| ਚਮੁਖਾ<br>ਡੰਡੱਡੰਡੀ<br>ਕੇਸ਼ਾਕੇਸ਼ੀ<br>ਹੱਥੋਂ-ਹੱਥੀ | चतुर्मुखः, (बहुव्रीहि समास)<br>दण्डादण्डि (बहुव्रीहि समास)<br>केशाकेशि (बहुव्रीहि समास)<br>हस्ताहस्ति (बहुव्रीहि समास) | "अनेकमन्यपदार्थे" [50] |

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

उल्लेखनीयमस्ति यत् पञ्जाबीभाषाया अपेक्षया संस्कृतसमासप्रक्रिया सुदीर्घा वर्तते अतः संस्कृतसमासप्रक्रियामनुसृत्य पञ्जाबीसमासस्य नवीनशब्दावलिः स्रष्टुमर्हाः वयम्। पञ्जाबीभाषायां समासस्यातीव महत्त्वं वर्तते। अत्र दैनिकप्रयोगे एषां समासपदानां प्रयोगस्तु अत्याधिको वर्तते। यथात्र – केसाकेसी, हत्थोहत्थी डांगोडांग, मुक्कममुक्की इत्यादिषु शब्देषु तु पाणिनेः 'इच् कर्मण्यतिहारे' सूत्रेणैव संसिद्धिः भवतीति।

संस्कृतस्य प्रभावः केवलं पञ्जाबीभाषोपरि एव नास्ति अपितु पञ्जाबीसाहित्यशास्त्रे अपि अस्य प्रभावस्तु अद्यापि निःसन्देहेन द्रष्टुं शक्यते। पञ्जाबीकाव्यशास्त्रस्य

विविधविधासुसस्कृतकाव्यशास्त्रस्यैव तत्त्वानि स्वीक्रियन्ते। यथात्रोदाहरणार्थं पञ्जाबीभाषायाः छन्द- अलंकार- गुण- शैली- रस-इत्यादीनामुपरि संस्कृतस्य प्रभावमवलोकयितुमर्हामः। अत्र स्थालीपुलाकन्यायेन पञ्जाबीछन्दसामुदाहरणानि प्रस्तूयन्ते।

I ਪਰੋਪਕਾਰੀ ਵਨ ਵੀਰ ਆਉ[51] उपेन्द्रवज्रा

II ਨੀਚੇ ਪੜੇ ਭਾਰਤ ਕੋ ਉਠਾਉ इन्द्रवज्रा

अलंकारस्योदहरणानि-

पूर्णोपमालंकारः

I ਖੁਸ਼ੀਆਂ ਚੁਪਾਸੇ ਫ਼ੁੱਲਾਂ ਵਾਂਗ ਮਹਿਕੀਆਂ।[52]
ਪੰਛੀਆਂ ਦੇ ਵਾਂਗ ਵਧਾਈਆਂ ਚਹਿਕੀਆਂ।।

लुप्तोपमालंकारः

ਰਾਤ ਕੁੜੀ ਦੀ ਝੋਲੀ ਪਾਉ
ਚਿੱਟਾ ਚੰਨ ਗਰੀ ਦਾ ਖੋਪਾ
ਨਾਲ ਸਿਤਾਰੇ ਮੁਠ ਛੁਆਰੇ

छेकानुप्रासालंकारः-

पञ्जाबीभाषायां भाई गुरदासमामहोदयानां बहुषु पद्येषु अनुप्रास-अलंकारस्य प्रयोगः दृश्यते। यथा-

ਭਾਉ ਭਗਤਿ ਭੈਂ ਭੇਲ, ਸਾਧ ਸਰੇਸਿਆ
ਨਿਤ ਨਿਤ ਨਵਲ ਨਵੇਲ, ਗੁਰਮੁਖ ਭੇਸਿਆ।

अनेन पत्रमाध्यमेन सिद्धयति यत् पञ्जबीभाषायाः मूलसंरचनायां तु नूनमेव संस्कृतं विद्यते। भाषायाः कदापि केनापि विशेषधर्मेण सह सम्बन्धो न भवति। भाषायास्तु नाम परिवर्तनमपि कालक्रमेणैव जायते। यथा पञ्जाबराज्यस्यैव पूर्वं नाम सप्तसिधुरासीत् । तदानीं प्रदेशस्यास्य भाषा संस्कृतमासीत् परंच यदा अस्यैव नाम ' पञ्जाबः अभवत् तदा अस्य भाषापि पञ्जाबी सञ्जातेति। निःसन्देहेन अद्यापि भाषेयं वैदिकसंस्कृतस्य प्रतिनिधित्त्वं करोतीति। संस्कृतस्य उपसर्ग-प्रत्यय- सन्धि-समास-इत्यादयः नूनमेव पञ्जाबीभाषायां स्वकीयं रूपं प्रदर्शयन्ति।पञ्जाबीभाषायांनिबद्धसाहित्यव्याकरणदर्शन आध्यात्मिकविषयकशास्त्राणामध्ययनाय कथं संस्कृतस्योपयोगित्वमस्ति इति स्पष्टमभवत्। अतः अत्र स्पष्टतया वक्तुं शक्नुमः यत् संस्क्ताध्ययनेनैव पञ्जाबीभाषायाः संवर्धनं भवितुमर्हति। पञ्जाबीभाषायां केचन एतादृशा सुदुर्लभाः ग्रन्थास्सन्ति येषामर्थावगमनं संस्कृतं ऋते न शक्यमस्ति। अतः अत्र द्वयोरनयोः भाषयोरध्ययनेन स्पष्टीजायते यत् कथं संकृतावदानेन पञ्जाबीभाषायाः परिरक्षणं परिसंवर्धनं च सम्भवेतिति।

सन्दर्भाः–

1 पारशर, श्यामदेव. (1990), *संस्कृत तथा पञ्जाबी के सम्बन्ध*, विश्वेश्वरानन्द वैदिक शोध संस्थान, साधु आश्रम, होशियारपुर.
2 सिंह, प्रेमप्रकाश. (1996), *पञ्जाबी भाषा का स्रोत व बणतर*, पब्लिकेशन ब्यूरो, पञ्जाबी विश्वविद्यालय, पटियाला.
3 पाराशर, श्यामदेव. (1990), *संस्कृत तथा पञ्जाबी के सम्बन्ध*, विश्वेश्वरानन्द वैदिक शोध संस्थान, साधु आश्रम, होशियारपुर.
4 सिंह, प्रेमप्रकाश. (1996), *पञ्जाबी भाषा का स्रोत व बणतर*, पब्लिकेशन ब्यूरो, पञ्जाबी विश्वविद्यालय, पटियाला.
5 Ibid
6 Pyles & Algeo, (1993) *The origins and development of the English language*, New York.
7 Pyles,Thomas & John Algeo, (1982) *The Origins and Development of the English Language*, Harcourt, New York.

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in





8 सिंह, पृष्ठ- 62-63
9 Ibid- 63
10 पाराशर, पृष्ठ-3
11 सिंह, प्रेम प्रकाश, भाषायाः न्यूनतमम् सार्थकम् रूपं 'मारफीम' इत्युच्यते।
12 Macdoneil, A.A, (1996) *A vedic Grammer for Students*, Oxford University Press, reprinted, p. 3.
13 सिंह, पृष्ठ-166
14 पाराशर, पृष्ठ-45
15 व्यास, भोलाशंकर, *संस्कृत का भाषाशास्त्रीय अध्ययन*, विश्विद्यालय प्रकाशन, वाराण्सी, पृष्ठ-113
16 ibid-113
17 सिंह, पृष्ठ-169
18 शास्त्री, हरिदत्त, (1973) *ऋक्-सूक्त-संग्रह' पुरुष सूक्त*, साहित्य भण्डार, मेरठ.पृष्ठ-152
19 सिंह,पृष्ठ-169
20 शास्त्री, हरिदत्त, *अग्निसूक्त* 1.1 पृष्ठ- 152
21 सिंह, पृष्ठ- 169
22 ibid-169
23 Epenthesis " a term to rafer to a type of INSTRUCTIN, where an eatra sound has been inserted medially in a word" David Crustal 1986, page -100
24 सिंह, पृष्ठ-170
25 "उच्चैरुदात्तः पाणिनि, *अष्टाध्यायी*,1.2.29
26 "नीच्चैरनुदात्तः पाणिनि, *अष्टाध्यायी*,1.2.30
27 "समाहरः स्वरितः पाणिनि, *अष्टाध्यायी*,1.2.31
28, सिंह पृष्ठ-171
29 ibid-171
30 "वृद्धिरेचि" पाणिनि; *अष्टाध्यायी*,6.1.88
31 पाराशर, पृष्ठ-189
32 "अकः सवर्णे दीर्घः, पाणिनि, *अष्टाध्यायी*,6.1.88
33 पाराशर, पृष्ठ- 173
34 hook ,Hans henrich(1991), *Principles of historical Linguistics*, Bealian.p.56
35 सिंह,पृष्ठ- 174
36 पाराशर, , पृष्ठ- 33-37
37 ibid- 163
38 प्र-परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप । " उपसर्गाः क्रियायोगे" पाणिनि, *अष्टाध्यायी*,1.4.59
39 सिंह, पृष्ठ- 175
40 ibid- 177-178
41 ग्राम-जन-बन्धुभ्यस्तल् पाणिनि, *अष्टाध्यायी*,4.2.43
42 सिंह, पृष्ठ- 135
43 पाराशर,पृष्ठ- 46
44 यास्क, निरुक्त (2006) व्याख्याकर 'छज्जुरामशास्त्री, मेहरचन्द लक्ष्मणदास, पब्लिकेशन्स, नई दिल्ली, पृष्ठ- 33
45 पाराशर, पृष्ठ- 40-45
46 ibid

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

47 कौर, धनवन्त, (2016) *पञ्जाबी भाषा का अध्यापन, द्वादश अन्तराष्ट्रिय पञ्जाबी विकास सम्मेलन* (शोधपत्रः- कपूर, कपिल 'Inner structure, sentence from and sentence Transformation) पब्लिकेशन ब्यूरो, पञ्जाबी विश्वविद्यालय, पटियाला, पृष्ठ- 158
48 पाणिनि, *अष्टाध्यायी* 2.2.29
49 पाणिनि, *अष्टाध्यायी* 2.1.52
50 पाणिनि, *अष्टाध्यायी* 2.2.24
51 जगी, रतन सिंह, (2016) *साहित्य कोष (पारिभाषिक शब्दावली)*, पब्लिकेशन ब्यूरो, पञ्जाबी विश्वविद्यालय, पटियाला, पृ.10
52 ibid, p. 19

## BIBLIOGRAPHY

1 पारशर, श्यामदेव. (1990), *संस्कृत तथा पञ्जाबी के सम्बन्ध*, विश्वेश्वरानन्द वैदिक शोध संस्थान, साधु आश्रम, होशियारपुर.
2 सिंह, प्रेमप्रकाश. (1996), *पञ्जाबी भाषा का स्रोत व बणतर*, पब्लिकेशन ब्यूरो, पञ्जाबी विश्वविद्यालय, पटियाला.
3 Pyles & Algeo, (1993) *The origins and development of the English language*, New York.
12 Macdoneil, A.A, (1996) *A vedic Grammer for Students*, Oxford University Press, reprinted.
4 व्यास, भोलाशंकर, *संस्कृत का भाषाशास्त्रीय अध्ययन*, विश्विद्यालय प्रकाशन, वाराण्सी.
5 शास्त्री, हरिदत्त, (1973) *ऋक्-सूक्त-संग्रह' पुरुष सूक्त*, साहित्य भण्डार, मेरठ.
6 शास्त्री, हरिदत्त, *अग्निसूक्त*.
7 Epenthesis, (1986) A term to rafer to a type of INSTRUCTION, where an eatra sound has been inserted medially in a word" David Crustal.
8 पाणिनि, *अष्टाध्यायी*
9 Hook, Hans Henrich(1991), *Principles of historical Linguistics*, Bealian.
10 यास्क, निरुक्त (2006) व्याख्याकर 'छज्जुरामशास्त्री, मेहरचन्द लक्षमणदास, पब्लिकेशन्स, नई दिल्ली.
11 कौर, धनवन्त, (2016) *पञ्जाबी भाषा का अध्यापन, द्वादश अन्तराष्ट्रिय पञ्जाबी विकास सम्मेलन* (शोधपत्रः- कपूर, कपिल 'Inner structure, sentence from and sentence Transformation) पब्लिकेशन ब्यूरो, पञ्जाबी विश्वविद्यालय, पटियाला.
12 जगी, रतन सिंह, (2016) *साहित्य कोष (पारिभाषिक शब्दावली)*, पब्लिकेशन ब्यूरो, पञ्जाबी विश्वविद्यालय, पटियाला.

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in





Paper Received on- 09.08.2018 Paper Published on 01-11-2018

# सामगानार्हणादिमन्त्रार्थः : विश्लेषणात्मकमध्ययनम्

पुनीतकुमारझा[239]

---

**मुख्यशब्दः**–खादिरगृह्यसूम्, जैमिनीयगृह्यसूत्रम्, कौथुमगृह्यसूत्रम्।

---

शोधसारः

आचार्यवर्याः कर्मकाण्डमन्त्रार्थ प्रदीपस्य मन्त्रार्थः आरभन्ते। इतः पूर्वं वाजसनेयिनां कृते प्रथर्मा भाग आसीत्। तथा स्वयमेवाहुराचार्याः –

नत्वा तातं सुकृतयषसा पूरिताषान्तरालं
श्रीकृष्णार्चाहृतमतिमलं नन्दलालं तयालम्।
तत्पादाब्जे निहितमनसं मातरं योगमायाम्[1] ( क०म०प्र०–232पृ० )

अनेन मंगलवचनेन ज्ञायत यदयमाचार्यो ऽधुना सामगानां कर्माणि व्याख्याति। तत्र सामगाः के सन्ति इति जिज्ञासायां सामान्येन ये सामाध्येतारस्ते सामगाः। सामाध्येतारष्च शाण्डिल्य गोत्रीयाः सावर्णगोत्रीया एव। किन्तु कानिचित् कुलानि वाजसनेयीयानि अपि आचार्यदि दोषात् सामगानि अभूवन। तत्र कौथुमषाखीयाः सामगा एव भवन्ति।

इदं च गोमिल गृह्यसूम् कौथुमीयं यद्यपि राणायनीया अपि इदंमेव गृह्य सूत्रमधीयते। राणायनीयानां सप्त प्रभेदा भवन्ति–1 राणयनीयाः –2, शाट्यमुग्रियाः –3, कालोपाः, 4 महाकीलोपाः, 5 लांगलायनाः, 6 शार्दूला, 7 कौयसाष्च[1]।( गो०गृ०पृ०–2 ) एवं च एतद्भिन्ना अपि में सामषाखा अधीयते तेऽपि सामगा एव कथयन्ते। त एव छन्दोगा इत्यपि लोका व्यवहरन्ति। सामवेदीयानां कृते अन्यान्यपि गृह्यसूत्राणि सन्ति यथा – 1. खादिरगृह्य सूत्रं , 2. जैमिनीय गृह्यसूत्रम्, 3. कौथुम गृह्यसूत्रम्। किन्तु प्रायः सर्वे समावेदीयाः गोभिल गृह्यसूत्रानुसारमेव कर्मानुतिष्ठन्ति। अत्र गृह्यसूत्रे सवेषा छन्दोग कर्मणां विषेषेण प्रक्रिया प्रदर्षिताः सन्ति। आचार्योपि एतद् गृह्यसूत्रपठितमन्त्राणामेव व्याख्यां कृतवान् तत्रापि प्रथमतः अर्हणीयान् मन्त्रान् व्याचख्यौ। अर्हणीया मन्त्रास्तु पारस्कर गृह्यसूत्रे प्रथमे काण्डे एव विवाह प्रकरणात् पूर्वं पठिताः किन्तु गोभिल गृह्य सूत्रें अर्हणीया मन्त्राः चतुर्थ प्रपाठकस्य दषमकण्डिकायां सन्ति गोभिल गृह्यसूत्रे चत्वारः प्रपाठकास्तत्र प्रथमे प्रपाठके नव कण्डिकाः चतुर्थे च दष कण्डिकाः सन्ति। चरम कण्डिकायामर्हणीय मन्त्राः। तत्र प्रथमं सूत्रम् –

---

[239] दरभंगा, बिहारः

उत्तरतो गां बध्वोपतिष्ठेरन् अर्हणा पुत्रवासेति।[2](गो०गृ०–10.12) अत्र सूत्रे मन्त्रो निर्दिष्टो यथा –

अर्हणा पुत्रवाससा धेनुरभवद् यमे।

सा नः पयस्वती दुहा उत्तरामुत्तरां समाम्।।[3] ( **मन्त्र ब्राह्मणम् –2.8.1** )

यद्यपि मन्त्रोऽयं गोभिल गृह्य सूत्रे व्याख्यातः[1] ( **पा०सू०–3.3.107** ) किन्तु आचार्य व्याख्यानं सातिषायि विद्यतो। तथा हि अर्हणा पूजासम्पादिनी इयं गौः। अत्र अर्ह पूजायामिति[2] ( **पा०धा०** )धातोः व्यासश्रन्थो युच[3] ( **पा०सू०–3.3.107**) इति युच् प्रत्ययः। एवं च पुत्र वाससा पुत्रवासं वत्सनिवासस्थानम् प्रति सीदति गच्छतीति सद् धातोः ड़प्रत्यये सति टिलोये रूपम्। पुत्रवासानुगामिनी इत्यर्थः। धेनुः सर्वार्थसाधिनी दधातेः नु प्रत्ययः। इत्थं शब्दव्याख्याने सर्व अपि व्याकरण प्रक्रियाः प्रदर्षिता विद्यन्ते।

ततोऽग्रे – इदमहमिमां पद्यां .....। इति व्याख्यातवान् अत्र अर्हणीयो वदति – अहमिदभासनम् इमां च पद्यां जदार्हाम्। अत्र पादवध्रीमिति गुणविष्णुः[4] ।( **क०म०प्र०–234** ) पद्यामित्यत्र पादार्धाभ्यांच[5] ( **पा०सू०–5.4.22** )इति यत् प्रत्ययः। ततः च विराजं विराजमानम्। अधितिष्ठामि आक्रामामि स्वीकरोमि। कस्मैं प्रयोजनाय ? अन्नाद्याय अदनीयायेति शेषः । यद्वा अन्नाधाय अन्नादौ भवाय सुखायेत्यर्थः।

ततोऽग्रे – या ओषधीः सोमराज्ञीः ....।[6] ( **मन्त्रब्राह्मणाम् –2.8.4** )

अस्य मन्त्रस्य व्याख्यानं सायणाचार्येण प्रदर्षितं यत् – मधुपर्ककर्ता आसनपादप्रासारणयोः विष्टरद्वयं सम्पादितवान् चेत् तदा–या ओषधीरिति द्वितीयया विष्टरे पादौ प्रसारयेत् तथा चोक्तम् – द्वौ चेत् पादयोर्द्वितीयया वक्ष्यमाणे मन्त्रैः पादौ प्रक्षाल्य द्वितीयं विष्टरमुदगग्रम् अधस्तात् पादयोः या ओषधीरिती द्वितीयया स्तृणुयात्। तत्र इयान् भेदः – पृथिवीम् अनु प्रसारणार्हायां पृथिव्यां सर्वत्र विष्ठिताः विविधं स्थिताः व्याप्ता ओषध्यः सन्ति। इत्येवमाह। अनयोः गुणविष्णुकृता व्याख्या तु ततः किचिद् भिन्ना। आचार्य व्याख्यानं तु गुणविष्णुव्याख्यानुसारि एव । किन्तु व्याकरण प्रक्रिया अधिका प्रदर्षिता । तत्र शतविचक्षणा इत्यस्य व्याख्याने गुणविष्णुः शतमुख्यः इत्याह। सायणः – बहुषः प्रजाजीवने निपुणाः। आचार्यस्तु शतं विक्षणानि मुखानि यासां ताः इति विग्रहवाक्येन व्याख्यातवान्। एवमेव द्वौवपि मन्त्रौ व्याख्यातवान्। पूर्वमन्त्रे आसनचर्चा द्वितीये च पाद चर्चाधिका इत्येव विषेषः।

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

ततोऽग्रे पादप्रक्षालन मन्त्रः – यतो देवीरिति ।[1] ( **मन्त्रब्राह्मणाम् –2.8.4** ) मन्त्रोऽयं तस्मिन्नेव प्रकरणे भट्टनारायणेन व्याख्यातः। अस्य व्याख्यान माचार्य वर्य स्वातन्त्र्येण कृतवान्। अत्र अब्देवतां सम्बोध्यते यत् सूर्यसकाषात् मां प्रतिसमृद्धियुक्त सतीं आगच्छेति।

1. ततः – सव्यं पादमवने निजेऽस्मिन् राष्ट्रे श्रियन्दधे[1] **(गो०गृ०–4.10.10)** । इति मन्त्रः उक्तः । अनेन मन्त्रेण पूर्वं सामगेन वामं पादं प्रक्षालयति मन्त्रोऽयं भट्ट नारायणेन व्याख्यातः[2] **(गो०गृ०–4.10.10)**। ततोऽपि बृहत्तरं व्याख्यानमाचार्यस्य [3]





**(क०म०प्र०–236पृ०)**। अनन्तरं दक्षिणपादप्रक्षालन मन्त्रः – दक्षिणं पादम् ....[4] **(तत्रैव –236पृ०)**

। अयमपि मन्त्रो भट्टनारायणेन तत्रैव व्याख्यातः । आचार्योऽपि अस्य व्याख्यां कृतवान् संक्षेपण। पुनष्चावषिष्टेन जलेन उभौ पादौ अर्हणीयः प्रक्षालयति अनेन मन्त्रेण –

पूर्वमन्यमपरमन्यभुमौ पादाववनेनिजे।

1. राष्ट्रस्पर्ध्या अभयस्यावरूध्यै ।।[5] **(म०व०–2.8.8)**

अस्य मन्त्रस्य विनियोगविषये नारयण भट्टेनोक्तं यत् विनियोगप्रमाणं तु खादिरगृह्यसूत्रे[6] **(गौ०गृ०पृ०–887)**। मन्त्रप्रयोगे त्रीणि प्रयाजनानि अदर्षितः– राष्ट्रस्य देषस्य ऋध्यै अभयस्य अवरूध्यै भयाभावस्य परिग्रहाय च। अत्रापि व्याख्याने व्याकरणप्रक्रिया प्रदर्षिताचार्य व्याख्याने । ततः अर्घ्यमन्त्रं प्रस्तौति ।

अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासम्[1] ( **म०ब्रा०–2.8.9** )इति। अस्य व्याख्याने नारायणभट्टः – हे उदकमयार्घ्य त्वमस्य राष्ट्रिराजयिता प्रवर्धयितासि अहमपि तव स्वीकारात् राष्ट्रिः अन्नस्य राजयिता अन्नस्य प्रख्यापयिता भूयासम्। बह्वन्नस्वामी भूयासमित्यर्थः। एतद् भिननं किचिद् व्याख्यानं समानाष्रय माह मुकुन्द झा बख्शी – हे अर्घ्य जलरूप त्वमन्नस्य अदनीयस्य राष्ट्रिः दीप्तिः। राजृदीप्तौ[2] ( **पा०धा०–822** ) भावे ष्ट्रिन्। अहमपि ते प्रसादात् राष्ट्रि दीप्तिमान् भूयासमिति। ततः – यषोऽसि यषो मयि धेहि। इति आचमनीयं जलं प्रषंसति। हे आचमनीयजल यतस्त्वं यषः कीर्तिरूपमसि अतो मयि विषये यषो धेहि मां यषस्विनं कुरु इत्यर्थः।

ततो मधुपर्क मन्त्रं प्रस्तौति – अन्यषसो यषोऽसि । अर्थात् हे मधुपर्क यतस्त्वम् यषोऽसि कीर्तिरिव मधुरोसि ततः तधोगादहमपि यषसः कीर्तिमान् संजातः। अत्र अर्ष आदिभ्योऽच[3] ( **पा०सू०–5.3.127** ) इति मत्वर्यीय अच् प्रत्ययः। अथ मधुपर्कं स्तौति अनेन मन्त्रेण – यषसो भक्षेसि ......। हे मधुपर्क यतस्त्वं यषसः यषसि यषस्विने यषस्विनः कृते वा भक्षः भक्षणीयः असि। तथा महसः महसे तेजसे महस्विनः भक्षः भक्षणीयः असि। तथा श्रीः श्रियै भक्षोऽसि। अतः श्रियं त्रितयस्यपि सम्पदं मयि धेहि।

अत्र गोभिल गृह्यसूत्रे मधुपर्कप्रकरणे आचान्तोदकाय गौरिति नापितस्त्रिर्पूयात् इत्यादिकं पठितम्। पुनष्च अर्घ्यः षड् विधाभवन्तीति प्रोक्तम्। किन्तु कर्मकाण्डमन्त्रार्थप्रदीपे अग्नि संस्कार मन्त्राः प्रतिपादिताः। तत्र प्रथमं मन्त्रः –

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

1. क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः।[1] **(य०वे० )** अत्र व्याख्याने क्रव्यादषब्दमादाय क्रव्यमपक्वमां समत्तीति क्रव्यादोऽग्नि : आममांस भक्षकः तम्। अद धातो क्रव्ये च[2] ( **पा०सू०–3.2.69** ) इति विट्प्रत्ययः । एवमेव रिप्रवाहः रिप्रं पार्थवहतीति रिप्रवाहः। अन्यत्सर्वं महीधरेण तुल्यम्। ततोऽग्रे इहैवायमितरः .....। इति व्याख्यातः। ततः आवसोः सदनेसीद इति मन्त्रोऽपि ब्रह्मोपवेषने व्याख्यातः। अनन्तरम् इदं विष्णुर्विचक्रमे .... इति मन्त्रव्याख्याने विषेषमाह – ''विष्णु भूम्याकाषस्वर्गात्मकं जगत्पादेनाक्रान्तवान् तस्य पदं भूम्यां सम्यक्ड् निविष्टभेतेन विष्णुपदसम्बन्धेन भूमिरतीव शुद्धेति सा भूमिरस्मिन सदने दुरूक्तादिकं समाधास्यतीति विषेषः[3] ( **क०म०प्र०– 241 पृ०** )। ततः कामस्तुति मन्त्रः –

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018

क इदं कस्मा अदात् .....। अत्र दातुः दानाभिमानाभावाय स्वस्यप्रतिग्रहणदोषा भावाच देहेन्द्रिव्यात्मसंधाते कामं विविनक्ति – कः नरः इदं प्रदेयभूतं वस्तु कस्मै नराय अदात् दत्तवान् इति प्रष्नक्रमे मन्त्रे एव उत्तरमाह– कामः कामायादात्। अर्थात् नान्यः कष्चित् दाता न च कष्चित् प्रतिग्रहीता अपि तु काम एव दाता काम एव च प्रतिग्रहीता तस्मादनयोः मध्ये न कष्चिदहंकारवान् भवति इति मन्त्रेण प्रतिपाद्यते। स च कामः समुद्रमाविषत् समुद्रं प्राप्तवान् अर्थात् कामः अभिलाषः समुद्रसदृषो गम्भीरः । समुद्रस्य अपार्यत्वात् गम्भीरत्वाच्च तत्सदृष एव कामो भवति।

1. मुच गां वरूणपाषात् .....[1] ( **क०म०प्र०–242पृ०** )। मन्त्रोऽयं सरलव्याख्यारूपेण पदानुसारं व्याख्यातः। ततो माता रूद्राणां दुहितावसूनाम्.....। इति गोरनुमन्त्रणमन्त्रः व्याकरणकोषाभ्यां व्याख्यातः। तत्र अदितिपदव्याख्याने विषेषमाह – अदितिमिति दो अवखण्डने इत्यस्मात् । क्तिनि। द्यतिस्यति....[2] ( **पा०सू०–7.4.40** ) इत्यादिना इत्थम्। अनवखण्डनीयामित्यर्थः । ततः विवाहप्रकरणस्यः कन्यायाः वस्त्र परिधानमन्त्रः – या अकृन्तन् अवयन् .... ।[3] ( **म०ब्र०–1.1.5** )

अयं मन्त्रः गोभिलगृह्यसूत्रस्य टिप्पव्यां व्याख्यातः आचार्येणापि तर्थव व्याख्यातः। किन्तु व्याकरणप्रक्रिया मन्त्रार्थऽधिकास्ति। ततो गोभिले – परिधत्तवाससेति च। प्रावृतां यज्ञोपवीतिनीम् अभ्युदानयन् जपेत् सोमोऽददद् गन्धर्वाय[4] ( **गो०गृ०–2.1.18** ) इति। अस्य मन्त्रस्य व्याख्यानं गृह्यसूत्रटिप्पण्यां विद्यते[5] ( **तत्रैव** ) तथापि आचार्य व्याख्याने व्याकरणपूर्वकं वैषिष्ट्यमिति विवकेः । ततः समजनमन्त्रः – समजन्तुविष्वे ....। इति। अयं मन्त्रः आचार्येणात्र न व्याख्यातः अपि तु जन्मग्रन्थि बन्धन प्रसंगे व्याख्यातः। ततः सोमोऽददद् गन्धर्वाय .... इति मन्त्रः भावार्थप्रतिपादन तया व्याख्यातः। अनन्तरं प्रमेपतिः मानः पन्थाः कल्पतां षिवा अरिष्टा पतिलोकं गमेयम् इति मन्त्रब्राह्मण मन्त्रः इत्यपि भावार्थप्रतिपादनरूपतथैव व्याख्यातः। गृह्यसूत्र भाष्येऽपि जपति। ततः प्रास्थाः पतिमानः .... इति कन्या स्वयमेव जपति। इत्यपि संक्षेपेण व्याख्यातः।

ततः अग्निस्थापनप्रकरणस्थभूमिजपमन्त्रो यथा – इदं भूमेर्भजामह इदं भद्रं सुमंगलम्। परासपत्नान् बाधस्वान्येषां विन्दते धनम्।।

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

इमं स्तोममर्हतो जातवेदसे रयमिव सम्महे मामनीषया । भद्राहि नः प्रभतिरस्य संसद्यग्ने सख्ये मारिषामा वयन्तव।। भरामेध्यं कृणवामा हबींषि ते चितमन्तः पर्वणा पर्वणा वयन्तव।। शकेमत्वा समिधं साधयाधियस्ते देवा हिवरदन्तयाहुतम्। त्वामादित्यां आपहतां ह्युस्मस्यग्ने सख्ये मारिषाया वयन्तव।।[1] ( **क०म०प्र०–249पृ०** )

1. एतेषां त्रयाणामपि भूमिजयमन्त्राणां व्याख्यानं भूरितरवैषद्येन कृतम्। अत्राग्निं सम्बोध्याह यत् भूमिसम्बन्धि स्थलं बहि्नाधिष्ठितं विद्यते। तामेव भूमिं वयं यजमानाः सेवामहे। तच्च भूमिस्थण्डिलं कल्याणकरं प्रषस्ततरच । तस्मात् हे अग्ने मम शत्रुन् परावाधस्व सुष्ठुपीडय[2] ( **वाधृविलोड़ने म्वा०** )। अत्र धातूपसर्गयोः व्यवधानेन पाठः[3] ( **पा०सू०–1.4.82** )। एतेन यः कष्चित् पुरूषः अग्नयधिष्ठिते स्थले कार्यं करोति



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018

सोऽपि अन्येषां धनिनां धनं लभते। तथा वयं स्तोमं स्तवं सम्मानयामः जातवेदोऽग्नये प्रीत्यर्थं तमनुकूलयितुम ? अत्र क्रियार्थोपपद स्येत्यादिना[4] (**पा०सू०–2.3.14**) चतुर्थी ।यथा सारथिः रथं मनीषया अनुकूलयति तद्वदेव । तेन अग्नेः प्रसादात् कलयाणकारिणी बुद्धिरूत्पद्यते। अतः कस्माच्चिदपि शत्रोः वयं परास्ता न भवेम।

ततष्च तृतीयेन मन्त्रेण अग्निं प्रार्थयति यत् हे अग्ने त्वमस्माकम् बुद्धी कर्माणि वा साधय अग्निं प्रार्थयति यत् हे अग्ने त्वमस्माकम् बुद्धी कर्माणि वा साधय त्वराधनयोग्यानि निष्पादय। यथावयं त्वदर्थं समिधं समिन्धामितुं शक्नुयाम। ततः ते देवा इन्द्रादयः त्वपि आहुतं हविः चरूपुराडाषादि अदन्ति। अतः त्वमदितेः पुत्रान् अदित्यान् आवह। आदित्यानित्यत्र अपत्यार्थे व्यप्रत्ययः[1] ( **पा०सू०–4.1.85** )। यतो हि वयं तान् उष्मसि। हे अग्ने तव सख्ये मित्र त्वे स्थिता वयं केनचिदपि आचार्येण बहूनि पदार्थसंयोजना य उदाहृतानि व्याख्याने आचार्येण बहुनि पदार्थसंयोजनाय उदाहृतानि । पुन रिषाभा इति प्रयोगे दीर्धविधायकं ततो दीर्घादटि समानपदि[2] ( **पा०सू०प्र०–8.3.9** ) इति उल्लेखितम्।

ततः पवित्रनिर्माणमन्त्रो यथा – पवित्रेस्थो वैष्णव्यौ इत्युल्लिख्य तदर्थोऽपि प्रतिपादितः । अनन्तर पवित्र करणार्थं विष्णोर्मनसा पूतेस्थः इति लिखित्वा निगदव्याख्यातम् इत्येव उक्तम्। ततः उत्पवनमन्त्रो यथा –

देवस्त्वा सवितोत्युना त्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रष्मिभिः।। अस्य मन्त्रस्य व्याख्याने आज्यं सम्बोध्य केषाचित् पदानां व्याख्यां विधाय पुनः तु इति पदपर्याय क्रमे शोधयतृ इत्युक्तम्। तत्र किं शोधयतु तदाह – अज्ञातकेषकोटादिसंसर्गदोषः तान् अपनयतु । ततः अग्नेः पर्युक्षणमन्त्रः – अदिते अनुमन्यस्व इत्यादिक मपिप्रस्तुत प्रकाषिते पुस्तके दृष्यते, किन्तु गोमिल गृह्यसूत्रे सर्वं प्रकरणं शैल्या निरूपितमस्ति, तदत्र न तथा । मन्त्राणां सन्निवेषः एकप्रणाल्या एव। तद्युक्तितरं न प्रतिभाति अतः गृह्य सूत्रेमनुसृत्य यथा प्रकरणं तथा समीक्षे।

---

**सन्दर्भग्रन्थसूची**

1. भारतीय कर्मकाण्ड स्वरूपाध्ययनम् – सम्पूर्णानन्द संस्कृतवि.वि. बनारस, 2011
2. पारस्कर गृह्यसूत्रम् (हरिहर गजाधर भाष्यम्) चौखम्बा सुरभारती प्रकाषन बनारसी 2011
3. गोभिल गृह्यसूत्रम् – मुन्सीराम मनोहरलाल पब्लिसर्स प्रा०लि०1982
4. कर्मकाण्डमन्त्रार्थ प्रदीपः म०म०मुकुन्द झा बख्शी स्ना०विद वि से.वि.वि. 2008
5. गोभिलगृह्यसूत्रम् मुकुन्द झा बख्शी – चौखम्बा संस्कृत संस्थान, वाराणसी
6. गोभिलगृह्यसूत्रम् – चिन्तामणि भट्टाचार्य कलकत्ता संस्कृत मोतीलाल बनारसीदास सीरीज

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018

Paper Received on- 12.08.2018 Paper Published on 01-11-2018

# स्तोत्रेषु शक्तितत्वम्

भगवती त्रिपाठी-सन्ध्यापाण्डेय

---

**मुख्यशब्दः** – वाग्देवता, कनकधारा, मानवजीवनम् ।

---

**सारांशः**

भगवत्पादशङ्कराचार्य प्रणीतेषु स्तोत्रेषु विविधाः विषयाः उपलभ्यन्ते। मानवजीवनस्य सदुपयोगाय कल्याणाय साफल्यार्थश्च आद्यशङ्कराचार्येण नैकानां स्तोत्राणां सर्जनं कृतम्। मानवजीवने चतुर्णां पुरुषार्थानां साधनमावश्यकं भवति। पुरुषार्थचतुष्टये द्वितीयः पुरुषार्थ, अर्थः वर्तते। अर्थात् अर्थसाधनं करणीयम्। अत्रेदमपि विचारणीयं यदर्थं विना धर्मसाधनं भवितुं नार्हति। अर्थात् धर्मसाधनार्थमपि अर्थः सहायको भवति। अर्थं विना मानवजीवनं निरर्थकं भवति। अत एवं सर्वैरपि अर्थसाधनं करणीयम्।

कनकधारास्तोत्रे भगवत्पादः शङ्कराचार्यः वदति यत् भगवती श्रीलक्ष्मी सृष्टिस्थितिप्रलयकालेषु वाग्देवता (ब्रह्मशक्ति) रुपेण शशिशेखर (शंकर) वल्लभा पार्वती (रुद्रशक्ति) रूपेण च विराजमाना भवति।

गीर्देवतेति गरुणध्वजसुन्दरीति शाकम्भरीति शशिशेखरवल्लभेति। सृष्टि-स्थिति-प्रलय-केलिषु संस्थितायै तस्यै नमस्तिभुवनैकगुरोस्तरुण्यै।

अर्थस्य (धनस्य) अधिष्ठात्री देवी लक्ष्मीः देवी वर्तते। अस्याः कृपाप्रसादात् धनस्य प्राप्तिः भवति। भगवत्पादेन कनकधारास्तोत्रस्य पाठं कृत्वा स्वर्णवर्षणं कारितम् इति जनश्रुतिः अस्य स्तोत्रस्य पाठेन जनाः भगवत्याः कमलालयायाः मङ्गलदेवतायाः 'लक्ष्म्या' कृपापात्रतां प्राप्य भाग्यवन्तो भवन्ति। यथोक्तं कनकधारास्तोत्रफलश्रुतौ-

**स्तुवन्ति ये स्तुतिभिरमूभिरन्वहम्**
**त्रयीमयीं त्रिभुवनमातरं रमाम्।**
**गुणाधिका गुरुतरभाग्यभागिनो**
**भवन्ति ते भवि बुध भाविताशयाः।।2**

भगवत्पादः शङ्कराचार्यः भवान्यष्टकमित्याख्ये स्तोत्रे पूर्णतः शरणागतः अङ्क अहङ्क। रशून्यश्च सन् शक्तिरुपां भवानीं स्तौति। कथयति च यत् भवती एव मम गतिरस्ति तथा भवसागरे पतितस्य मम तारणकारयित्री वर्तते। देव्यपराधक्षमाऽऽधारभूतायाः समर्चा विहितास्ति।

**विद्याः सम्सतास्तव देवि भेदाः**
**स्त्रिय समस्ता सकला जगत्सु**
**त्वयैकया पूरितमम्बयैतत्**



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-34th & 35th , Year 09, Vol -III, 01 November, 2018

**का ते स्तुतिः स्तव्यपरा परोक्तिः।।3**

इयमेव पराम्बा भगवती समस्तजगतां हेतुः आद्या प्रकृतिश्च वर्तते। पुण्यात्मनां गृहेषु लक्ष्मीरुपेण पापात्मनां गृहेषु अलक्ष्मीरुपेण निवसति।

**या श्री स्वयं सुकृतिनां भवनेष्वलक्ष्मीः**
**पापात्मनां कृताधियां हृदयेषु बुद्धिः।**
**श्रद्धा सतां कुलजन प्रभवस्य लज्जा**
**तां त्वां नताः स्म परिपालय देवि विश्वम्।।4**

अन्नपूर्णास्तोत्रे सैव शक्तिः काशीपुराधीश्वरी अन्नादीनामधिष्ठात्री देवता अस्ति। इयमेव ब्रह्माण्डभाण्डोदरी विश्वेशमनः प्रसादनकरी कृपावलम्बनकरी वर्तते।

दृश्यादृश्यविभूतिवाहनकरी ब्रह्माण्डभाण्डोदरी लीलानाटकसूत्रभेदनकरी विज्ञान दीपाङ्कुरी श्रीविश्वेशमनः प्रसादनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी।।5

एवं वयं पश्यामो यत् भगवत्पादः शङ्कराचार्यः अनेकेषु स्तोत्रेषु शक्तितत्वं स्तौति। वस्तुतः शक्त्या एव इदं चराचरात्मकं जगत् प्रवर्तते। अत एव शक्तेः पूजनम् आचार्येण सश्रद्धं कृतम्।

**सन्दर्भाः**

1. कनकधारास्तोत्र श्लोक संख्या-10 गीताप्रेस प्रकाशन।
2. कनकधारास्तोत्र श्लोक संख्या-18, गीताप्रेस प्रकाशन।
3. दुर्गासप्तशती अध्याय-11 श्लोक-6, गीताप्रेस प्रकाशन।
4. दुर्गासप्तशती-अध्याय-11 श्लोक-5
5. अन्नपूर्णास्तोत्रम्-श्लोक संख्या-7, गीताप्रेस प्रकाशन, 2013

Sanskrit E-Journal ( A Portal of Sarasvat-Niketanam ) www.jahnavisanskritejournal.in

 ISSN 0976-8645

# Important dates for next Issue-

- ✓ DEADLINE FOR SUBMISSION- 01.12. 2018
- ✓ NOTIFICATION FOR ACCEPTANCE-25.12.2018
- ✓ INAUGRATION-15.01.2019

**Send your paper**



bipinkumarjhaofficialid@gmail.com

jahnavisanskritjournal@gmail.com